Shri Raghunath Temple MSS. Library,
JAMMU

No. १५५४

Title न्याय सिद्धान्त मञ्जरी

Author चूडामणि भट्टाचार्यः

Extent १४ Age ०

Subject न्याय शास्त्रं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

न्यायसिद्धांतमञ्जरी

१५५४

७

१४ प०

8-9 M.

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

शं भोमध्यगते हरीनेंहरभूदेक्षो हर्यौर्कः रैभां स्येनागस्तुता. रवोहरगणेशाजांबिका: स्थापिता: देव्यांविष्णुहरैकदन्तरवयो लंबोदरेजे स्वरेनार्या:

शङ्करकोणतो निरुक्तदा स्वस्ता स्वलेशानिशा:

हरि:		सूर्य:
	शंभु:	
दुर्गा		गणेश:

शङ्कर:		गणेश:
	हरि:	
दुर्गा		सूर्य:

हर:		गणेश:
	रवि:	
दुर्गा		विष्णु:

विष्णु:		शिव:
	देवी	
रवि:		गणेश:

विष्णु:		ईश:
	गणेश	
दुर्गा		सूर्य:

मगीथयंत्रे कार्तिगेहेडुग्धं विजेयामूलं नेत्रंमेसनाभ्यांयन्त्रंलेख्यंमूलंपत्रेनीलवस्त्रनीलतन्तुभ्यां वेष्टनीयमादित्यादि दिने

२	९	४
७	५	३
६	१	८

स्वविषयतत्तावच्छिन्नविषयक संस्कारसहित स्वविषये दत्तावच्छिन्नलौकिकसन्निकर्षजन्यं तदुभयतादात्म्याशानंप्रत्यभि
ज्ञा स्वविषययावद्विषयक संस्कारजन्यंज्ञानंस्मरणम्

36

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अयं[illegible]उत्कृष्टइत्यत्रापकृष्टइतिज्ञानविशेषोनमस्कारपदार्थःकृतोनम[illegible] परमात्मानमिति परमत्वंचनित्यज्ञानादिमत्वं सर्वोत्कृष्टत्वंच तथाचसमानसंविहेश्वरतयासर्वस्मिन्तदपेक्षयाऽपकृष्टत्वेज्ञातेसर्वान्नःपातिनिस्वमिति
त्वविषयापकृष्टत्वज्ञानात्ननमस्कारइतिनिर्वाहइतिभावः मंगलस्यसमाप्तिप्रतिविघ्नध्वंसद्वाराहेतुत्वमितिसिद्धान्तःस्थितः =१ विलक्षणश्रवणभावप्रयोजकीभूताभावप्रतियोगित्वंविमोक्षत्वमुख्योपायत्वम् विलक्षणमुक्तित्वंचमननादिप्र
त्ययुक्तित्वम् तथाचमननादिप्रयोज्यमुक्तिप्रतिमननोपायतत्त्वज्ञानंकारणं काशीमरणादिप्रयोज्यमुक्तिंप्रतिकाशीमरणजन्यतत्त्वज्ञानंकारणमितिभावः =२ लक्षणस्वरूपप्रामाण्यादिप्रकारकवर्तमाननिरूपणविषयीभूतंप्रमाणम् =३ प्रमा
धारणधर्मोद्दिष्टत्वे यथासास्नादिमत्त्वंगवीगौरिति तद्विशेष्यकत्वप्रतीत्यर्थः तद्विशिष्टविशेष्यतानिरूपिततत्संबंधावच्छिन्नविशेष्यकारताशालित्वमितिनिष्कर्षः तथाचतत्संबंधावच्छिन्नविशेष्यकारताशालित्वात् तत्संबंधावच्छिन्नविशेष्य
कारत्वप्रमात्वमितिफलितम् साधारणत्वेनामकार्यतावच्छिन्नजन्यतानिरूपितकारणताश्रयत्व असाधारणत्वेनामप्रकिंचित्कार्यतानिरूपितकारणताश्रयत्वम् =२

मं॰ टी॰
१ ॥

ॐ श्रीगणेशायनमः ॥ प्रणम्यपरमात्मानंजानकीनाथशर्मणा क्रियतेयुक्तिमुक्ताभिर्मञ्जुसिद्धांतमंजरी १ इहकिलनिखिललोकविमो
क्षमुख्योपायंमननोपायमात्मनस्तत्त्वज्ञानमामनंति तच्चप्रमाणाधीनमितिप्रमाणंनिरूप्यते तत्रप्रमायाःकरणंप्रमाणं प्रमाचयथार्थानुभ
वः तदाहुराचार्याः यथार्थानुभवोमानमिति ननुकिमिदंयाथार्थ्यम् किंचानुभवत्वं उच्यते तद्वतितदवगाहित्वंयाथार्थ्यम् भवतिहिरजते
इदंरजतमितिज्ञानंरजतत्ववतितदवगाहीतियथार्थं शुक्ताविदंरजतमितिज्ञानंचनरजतत्ववतितदवगाहीतिनयाथार्थम् नन्वेवंरजतेरंगंरजतं
नवेतिसंशयोपिप्रमास्यादितिचेन्न रजतत्वांशेप्रमैव तद्वतितदनुभवत्वात्प्रमेतिप्रामाणिकाः ननुशाखावच्छेदेनकपिसंयोगवतिवृक्षेमूलेऽ
स्तःकपिसंयोगीतिप्रत्ययोऽप्रमास्यात् कपिसंयोगवतिवृक्षेतदवगाहित्वात् इतिचेतन्नवृक्षेकपिसंयोगइत्यंशःप्रमैव मूलावच्छेदकत्वप्रत्ययस्तु
नतथा तस्यतदनवच्छेदकत्वात् स्मृतिभिन्नज्ञानत्वमनुभवत्वंजातिविशेषोवा अनुभवामीत्यनुगतप्रतीतेर्बाधकंविनाजातिविषयत्वात् करण
त्वंचव्यापारवदसाधारणकारणत्वम् घटंप्रतिकपालसंयोगद्वारेणव्यापारवदिति ईश्वरज्ञानद्वारेणापिसाधारणमिति नन्वेवंज्ञानंप्रत्या
त्मापिकरणंस्यात् आत्ममनःसंयोगस्यव्यापारस्यसत्त्वात् तज्जन्यत्वेसतितज्जन्यजनकोव्यापारः भवतिचसंयोगआत्मजन्यआत्मजन्यज्ञानजनक
श्चेतिचेत्सत्यमेव उपाधीनांकरणत्वादीनांभेदात्तुव्यवहारभेदः अतएवविवक्षातःकारकविभक्तयोनानाभवंतीतिशाब्दिकाः अतएवआत्मान
आत्मनावेत्तीतितृतीया शिवादित्यमिश्रास्तु करणत्वाकारानुगतमतेःकरणत्वादिकमखंडोपाधिरूपंसामान्यमंगीचक्रुः तच्चप्रमाणंचतु
र्विधमित्याहभगवान्सूत्रकारः प्रत्यक्षानुमानोपमानशब्दाःप्रमाणानीति तत्रसाक्षात्कारप्रमाकरणंप्रत्यक्षम् साक्षात्कारत्वंचसाक्षात्करोमी
त्यनुगतप्रतीतिसाक्षिकोजातिविशेषः नचेयमिंद्रियजन्यज्ञानत्वविषया ज्ञानमात्रस्यमनोरूपेंद्रियजन्यत्वात् इंद्रियप्रतीतावपितत्प्रतीतेश्च ।
नापिव्याप्त्यप्रत्यक्षाजातिविषयाननुगतत्वात् यद्वाज्ञानाधीनजन्यमात्रवृत्तिजातिमज्ज्ञानत्वंतत् भवतिहिज्ञानाधीनजन्यमात्रवृत्तिप्रत्यक्षमितितदा
दितत्त्वंचसाक्षात्कारमात्रे नचनिदिध्यासनजन्यमात्रवृत्तिमोहजनकतावच्छेदकजातिमत्त्वंतत्साक्षात्कारेऽव्याप्तिर्मानसा[illegible]वृत्तित्वेनजातेर्वि
शेषणीयत्वात् मानसत्वंचजातिविशेषः इत्यास्तांविस्तरः नागिकास्तुवैशिष्ट्यावगाहिनसाक्षात्कारः अयंघटइत्यादिज्ञानेचसाक्षात्कार
त्वप्रत्ययोभ्रांतिः घटत्वाद्यलीकविषयत्वादित्याहुः तन्न बाधकंविनाभ्रांतित्वायोगात् नचालीकविषयत्वंबाधकम् घटत्वादेरलीकत्वासिद्धेः
सचसाक्षात्कारोद्विविधः नित्योऽनित्यश्च नित्योभगवतः अनित्योऽन्यः अनित्योद्विविधः निर्विकल्पकःसविकल्पकश्च तत्रवैशिष्ट्यानवगाहि

तत्साक्षात्कारस्यत्त्वप्रत्यक्षत्वात् यारोप्यत्वप्रकारकत्वात्रूपम् कं॰
[illegible] =४

तस्यमूलस्यकपिसंयोगान
वच्छेदकत्वात् =७
=४ तत्वेदेनकरणत्वेनाभिमत
त्वम् तथाचकरणत्वेनाभिमतज
न्यजनकोव्यापारः इतिव्यापार
लक्षणम् तज्जन्यत्वावच्छिन्न
प्रतियोगिसाधारणकारणतावत्त्व
मितिस्पष्टम् =५ सहकारिविर
हेफलायोगव्यवच्छेदस्यासंभवा
त् सहकारिसमवधानेफलायो
गव्यवच्छिन्नकारणंकरणम् स
हकारिसमवधानेफलायोगव्य
वच्छेदस्यात्मनिसत्वात्तस्यातेप्य
गतेरितिभावः =१० त्वरी
यायाःकरणार्थकत्वात् =११
साक्षात्कारोपिप्रतीतिः =६ ज
न्यावच्छेदीःव्याप्तिज्ञानपदज्ञाना
दि =५

=८ निदिध्यासनेनानुपलक्षणम्
काशीमरणस्थलेतारकोपदेश
जन्यज्ञानेव्याप्तिवारणाय निदिध्या
सनेनतेनजन्याधीजन्यमात्रवृत्तिस्त्वितम् =५

एवंविधलक्षणकरणे =८
एकस्यैवकर्तृत्वकरणत्वस्वी
कारादेव =९ आत्मनःकरण
त्वस्वीकारादेव =१०
अव्यभिचारावतिव्याप्तिः =६
आदिपदादुपमितित्वशा
ब्दत्वयहः =५
मानसवृत्तिजातिविशेषण
मावश्यकमितिध्येयम् =८
अभावस्यापिप्रत्यक्षादिपदार्थवद
नुभूयमानतयाऽलीकत्वमसि
द्धमितिभावः १ अतएवाहाभिद
पदार्थस्यालीकत्वम् =२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

वि॰

नेनिष्प्रकारकं वा ज्ञानं निर्विकल्पकम् न च तदप्रसिद्धं अतीन्द्रियत्वाभ्युपगमात् तथापि घटोयमिति विशिष्टज्ञानस्य कार्यात्तदनुमेयम् न
चादि तत्र न हि विशिष्टज्ञाने प्रति न हि विशेषणज्ञानं कारणमिति निर्बीजम् भवति च घटोयमिति कर्मसाक्षात्कारे घट इति ज्ञानेन घटत्वविशिष्टज्ञानमतस्त
ज्ञापि घटत्वज्ञानं कारणम् न च तज्ज्ञानं घटत्वविशिष्टज्ञानमिति विशेषणीभूततद्घटत्वस्यासाम्नात् ततो वैशिष्ट्यानवगाहि घटत्वज्ञानम् तदेव नि
र्विकल्पकम् न च नन्यान्तरीयघटत्वविशिष्टज्ञानं तत्र कारणम् अव्यवहितपूर्वकालवर्त्तिनस्तद्विशेषणज्ञानस्य तत्र हेतुत्वात् न च भागवते घटत्वज्ञा
नेतज्जनकम् सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वात् भगवज्ज्ञानस्य व्यधिकरणत्वात् न त्वन्यघटत्वविशिष्टस्मरणमेव तत्र कारणम् न च विशे
षणज्ञानं विना तदेव विशिष्टज्ञानं कथमिति वाच्यम् विशिष्टानुभवे हि विशेषणज्ञानं कारणम् न तु स्मरणेपि तेन विनाप्युपपत्तेः अन्यथाऽनवस्था
नात् अस्तु वा निर्विकल्पकं घटत्वस्मरणमिति चेन्न चैत्राद्विशिष्टबुद्धेरसंभवात् न हि चैत्रादिकं सर्वमनुभूतं यतः स्मरेत् न चानुभवं विने
व स्मरणम् तस्य तद्धेतुत्वात् किं च यत्र घटत्वेन स्मृतेस्तत्र विशिष्टज्ञानसामग्र्यभावात् घटघटत्वयोः साक्षात्कारसामग्री तस्मात् साक्षात्कारो योनेन किंचिद्द्वाय
कमस्ति तदेव चास्माकं निर्विकल्पकमिति संक्षेपः ननु विशेषणज्ञानस्य हेतुतासिद्धौ सर्वमेवं तदेव तु स्यात् तदेव मानेन पश्याम इति चेन्न अन्वयव्य
तिरेकाभ्यां तदवधारणात् विस्तरस्तु मणिमरीचावनुसंधेयः वैशिष्ट्यावगाहि सप्रकारकं ज्ञानं सविकल्पकम् प्रकारता चायं घट इत्यादिज्ञाने वि
शेषणस्य घटत्वादेर्विशेषणतापरनामा विषयताविशेषः विषयता च विषयाकारप्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः पदार्थान्तरमित्येके शि
नः अस्माकं ज्ञानं तावत् घट इति प्रतीतेः ज्ञानजन्यः विषयनिष्ठः प्राकट्यापरनामा पदार्थो ज्ञातता सैव विषयता ज्ञानविषययोः संबंधस्वरूपा युक्तं चैतत् कथं
मन्यथा ज्ञानकर्मत्वं घटादेः क्रियाजन्यफलशालित्वाभावादित्याहुः तन्न विनष्टेपि घटे ज्ञातघट इति प्रतीतेः न हि तत्र ज्ञानं किंचिज्जनयितुं शक्नोति तस्यैवा
सत्त्वात् न च समवायिकारणं विना भावकार्योत्पत्तिः संभवति तत्र स्वरूपसंबंधविशेषस्य प्रतीतेर्विषय इति चेत् अन्यत्रापि स एवास्तु कृतमधिके
न कर्मविभक्तेरपि तद्वैवोपपत्तेरिति संक्षेपः एतेन भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं अयं घट इत्यत्र हि घटस्यैव वैशिष्ट्यं भासते तत्प्रतियोगी
च घटत्वमित्याहुस्तन्न दण्डपुरुषसंयोग इति समूहालम्बने दण्डीपुरुष इतिवत् दण्डस्य प्रकारतापत्तेः संयोगो हि दण्डस्यैव वैशिष्ट्यं भासते तत्र तत्प्रतियो
गी च दण्ड इति दिक् तच्च प्रत्यक्षमिन्द्रियात्मकं द्वेधा द्रव्यग्राहकं तदग्राहकं च द्रव्यग्राहकाणि चक्षुस्त्वङ्मनांसि प्रसिद्धत्वात् घ्राणरसनश्रवणानि च ननु मनसो द्र
व्यग्राहकत्वे सति अन्धस्यापि चित्रकुड्याद्युपलब्ध्यापत्तिः न च तदात्ममात्रग्राहकं सर्वविषयकत्वसिद्धान्तव्याघातात् उच्यते मनः सर्वविषयकमपि

(margin:) यत्र घटत्वस्य ... नेति / घटादि विशिष्टज्ञानस्य घट / त्वविशिष्टज्ञानजन्यत्वं / भावान्निर्विकल्पकसिद्धि / रिति भावः

(margin:) त्व ८

(margin:) द्रव्यग्राहक

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

मं·री
३

बहिर्विषयकज्ञानजनने परतंत्रं परं चक्षुरादि उपस्थितिर्योगजधर्मः सामान्यलक्षणा च न पुनः चक्षुरादिमात्रं ज्ञानलक्षणाप्रत्यासत्त्या सन्निकृष्टपदार्थो
ऽपि मनसा संसर्गग्रहात् कथमन्यथा कविकाव्यादि योगिनां योगजधर्मप्रत्यासत्त्या मनसा सर्वसाक्षात्काराच्च मेयत्वादिसामान्यलक्षणप्रत्यासत्त्या
मनसा सर्वग्रहाच्च तर्हि मनः स्वतंत्रं अबाह्यवस्तुनि कार्यत्वे बाह्यानि आत्मानं योग्यगुणांश्च स्वभावतः तिद्ध केन योग्यगुणाः सविकल्पक।
ज्ञानेच्छाप्रयत्नसुखदुःखद्वेषास्तेषु एकत्वपरिमाणे च तदेकत्वपरिमाणेन योग्ये इति तट्टीकाकृतः न विशेषं परात्मा परेणाग्रहो तेन तद्गुणस्य इति चेत् न
परात्मतद्गुणानां परायोग्यत्वात् स्यादेतत् चक्षुर्योग्यद्रव्यग्राहकं न तत्र परमाण्वादौ योग्ये इति चेत् न तेषां चक्षुरयोग्यत्वात् किं तावच्चक्षुर्यो
ग्यं महदुद्भूतरूपवद्द्रव्यम् परमाण्वादिमहत् आत्मादयस्त्वरूपवंतः पिशाचादयस्तु नोद्भूतरूपवंतः तद्रूपस्यानुद्भूतत्वात् उद्भूतत्वं जातिविशे
ष इत्येके अनुद्भूतत्वरूपजात्यभाव इत्यपरे योग्यगुणाः योग्यद्रव्यवृत्तिमात्रवृत्तिसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगाः ।
मात्रपदं घटाकाशसंयोगवारणाय कर्म च योग्यद्रव्यसमवेतं जातिश्च योग्यवृत्तिगता द्रव्यत्वरूपत्वादि समवायश्च त्वचो महदुद्भूतरूपस्पर्शवद्योग्यं द्रव्यं
तेन न परमाण्वाद्युपरि दीपप्रभा द्रव्यं चाग्रह्यते परमाणोरमहत्त्वात् वायोर्नीरूपत्वात् प्रभायाऽनुद्भूतस्पर्शाभावात् गुणास्तु रूपातिरिक्ता वत्त्वचो यो
रूप॰ ग्याः महदुद्भूतस्पर्शवन्मात्रवृत्तयो महदुद्भूतस्पर्शश्च अत एव वायुपरमाण्वादौ घटत्वं वा न गृह्यते चक्षुरयोग्यत्वात् न वा दीपप्रभापरिमाणादयः उ
द्भूतस्पर्शवद्वृत्तित्वात् न वा द्रव्यप्रभासंयोगादय उद्भूतस्पर्शवन्मात्रवृत्तित्वात् तद्धि अनुद्भूतस्पर्शे द्रव्ये वर्तते कर्म च योग्यद्रव्यसमवेतं सामान्यं च
योग्यव्यक्तिगतं समवायश्च मीमांसकास्तु महदुद्भूतस्पर्शवद्द्रव्यत्वेनैव त्वचो योग्यतालाघवात् न तु महदुद्भूतरूपवत्त्वस्य योग्यत्वं गौरवात् अ
तो वायुरपि स्पार्शनप्रत्यक्षः न च बहिरिंद्रियजन्यद्रव्यसाक्षात्कारत्वावच्छेदेनोद्भूतरूपस्य हेतुत्वात् वायोस्तदभावान्नैवमिति वाच्यम् लाघवाद्द्रव्य
चाक्षुषत्वावच्छेदेन तद्धेतुत्वादित्याहुः वैशेषिकास्तु समवायोऽप्रत्यक्षः संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् कथमन्यथा घटाकाशसंयोगोऽपि न स्पा॰
प्रत्यक्षः न च समवायस्य सर्वे आश्रयाः प्रत्यक्षाः परमाण्वादेरयोग्यत्वात् इमाऽनुभूतत्वा तथा हेतुत्वे मानाभावात् न च घटाकाशसंयोगस्याप्रत्यक्षतापा
त्तिः योग्यमात्रसमवेतगुणस्येव योग्यत्वात् किं च लाघवात् संयोगप्रत्यक्षत्वावच्छेदेन यावदाश्रयप्रत्यक्षस्य हेतुता न तु संबंधप्रत्यक्षत्वावच्छेदेन सं घ्राणमात्र॰
बंधत्वं हि संयोगसमवायान्यतरत्वमिति गौरवात् घ्राणयोग्यो महत्त्वसमानाधिकरणोद्भूतो गंधस्तद्गतं सामान्यं तयोः समवायः अत एव परमाणुषु २
गंधो न गृह्यते महत्त्वासमानाधिकरणत्वात् न वा घ्राणमतिकस्तूर्यादिगंधः अनुद्भूतत्वात् रसनायोग्यो महत्त्वसमानाधिकरणोद्भूतो रसः तद्गतं च सा

गम्यगन्धत्वयोः ऽ॰

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

मात्रम् तयोः समवायः तेन परमाणुरूपं नोपलभ्यते महत्त्वासमानाधिकरणत्वात् नवा मणुत्वादिरसः अनुद्भूतत्वात् श्रवणयोग्यः शब्दस्तज्जा
तिस्तयोः समवायश्चेति संक्षेपः तस्यैवेन्द्रियसन्निकृष्टार्थग्राहकत्वात् सन्निकर्षाः सहकारिणः केते सन्निकर्षाः संयोगः संयुक्तसमवायः संयुक्त
समवेतसमवायः समवायः समवेतसमवायः विशेषणता च पृथक्केन सन्निकर्षेण किं गृह्यते द्रव्यं संयोगेन शब्देतरगुणः कर्मद्रव्यगता
च जातिः संयुक्तसमवायेन भवति हि घटादि चक्षुरादिसंयुक्तं तत्र समवेतं रूपादि स्पन्दो जातिश्च द्रव्यत्वादि शब्देतरगुणकर्मगता जातिः संयुक्त
समवेतसमवायेन भवति हि चक्षुरादिसंयुक्ते घटादिस्तत्समवेतः रूपादिस्तत्र समवायो रूपत्वादेः शब्दः समवायेन कर्णशष्कुल्यवच्छिन्ने नभसि त
स्य समवायात् शब्दगतानां जातिः समवेतसमवायेन श्रवणसमवेते शब्दे शब्दत्वादीनां समवायात् विशेषणतया समवायोऽभावश्च तत्र सं
योगसमवाययोरभावात् सा च विशेषणता द्विधा इन्द्रियविशेषणता इन्द्रियसन्निकृष्टविशेषणता च तत्रेन्द्रियविशेषणतया शब्दाभावो गृ
ह्यते इन्द्रियस्य श्रवणेन तस्य विशेषणत्वात् इन्द्रियसन्निकृष्टविशेषणतया भूतलादौ घटाभावादिर्गृह्यते इन्द्रियसन्निकृष्टे भूतले तस्य विशेषण
त्वात् इन्द्रियसन्निकृष्टविशेषणतापि बहुविधा सन्निकर्षस्य बहुत्वादेव सेयम् न तु संयोगेन भ्रत्वासतिः संयुक्तसमवायेन घटादिग्रहसंभवात् इ
न्द्रियसंयुक्ते कपालादौ तेषां समवायात् मैवम् आत्मनि तदसंभवात् तस्यासमवेतत्वादिति संक्षेपः स्यादेतत् अन्धकारस्थघटादिः किमिति चक्षु
षा नोपलभ्यते संयोगस्यासन्नेः सत्त्वात् उच्यते चक्षुषो द्रव्यग्रहे महदुद्भूतरूपालोकसंयोगः सहकारीति न चान्धकारस्थघटे सोऽस्ति न च महदुद्भूत
रूपवत्त्वे तेजःपरमाणुचक्षुरादिसंयोगयोर्विद्यमानत्वात् न चैवं चक्षुषा तेजःप्रत्यक्षं न स्यात् तत्र तेजःसंयोगाभावात् प्रदीपेन प्रभासंयोगोऽस्तीति
चेन्न मणिप्रभादौ तदभावात् दृश्यते च महान्धकारे चन्द्रकान्तप्रभृतिमणिविशेषमणिप्रभा अथालोकेन रूपवत्त्वं गृह्यते आलोकः सहकारीति चेन्न
महान्धकारे सुवर्णरूपतेजःसाक्षात्कारापत्तेः उच्यते द्रव्यचाक्षुषसामान्ये आलोकसंयोगो हेतुः न चालोकचाक्षुषे व्यभिचारः आलोकाकाशसं
योगस्यालोकेऽपि सत्त्वात् तस्य हि द्विष्ठत्वात् न चैवमन्धकारे सुवर्णसाक्षात्कारापत्तिः अनभिभूतरूपालोकसंयोगस्यैव हेतुत्वात् सुवर्णरूपं त्वभिभूतमस्य
यास्सुवर्णरूपालोकसंयोगात् तस्यान्तरग्रहापत्तेः संप्रदायविदस्तु सुवर्णभिन्नं यत्तेजस्तद्भिन्नद्रव्यचाक्षुषे आलोकसंयोगो हेतुः भवति च सुवर्ण
मपि सुवर्णभिन्नं यत्तेजस्तद्भिन्नं तत्र तद्ग्रहेऽप्यालोकसंयोगो हेतुः तेनान्धकारे न सुवर्णसाक्षात्कारप्रसङ्गः तथापि सर्वस्यां दिशि आलोकसंयोग
वतः परस्यान्तदसंयुक्तस्यापि स्यादेः परदिगवच्छिन्नरूपत्वेण साक्षात्कारः स्यात् आलोकसंयोगस्य सर्वदिगवच्छेदेन सत्त्वात् मैवम् यदवच्छेदेना

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

मं॰ टी॰ २

३

लोकसंयोगस्तद्वद्भेदेनवत्वतः संयोगस्यदेशत्वात् इदानीं तदभावात् स्यादेतत् विशेषणतानवस्थाप्रसक्तिः समवायाभावयोरेवासत्वात् नहि तयो
र्मानमस्ति अथोच्यते यद्यद्रूपवान् येचलतिश्चलति स एवमेव घटत्वरूपवत्त्वसंबंधविषयकं समवाये मानम् नहि घटादौ नेत्यास्य संबंधोस्ति
ति चेन्न स्वरूपसंबंधस्यैवाधाराधेयभावाख्यस्य सत्वात् नहि समवाय एव घटस्याधारता पटादावपि सत्वात् एक एव हि घटत्वपटत्वयोः समवा
यः मैवम् घटे घटत्वेन रूपं च समवेतं तेन गुणः समवेतः इह कर्म समवेतमिति अनुगतसमवायाकारप्रतीत्या सिद्धेः नाभावोपि घटो नास्तीति प्रती
त्या तत्सिद्धेः अथ प्राभाकराः नाभावोऽधिकः किंतु केवलाधिकरणस्वरूप एव तत् किंतु ह्यायथन्यामतं तरकल्पनेन ननु किमिदं केवलत्वम् भूत

घट। अभावत्वापत्तिः

लस्वरूपं चेत्सघटभूतलस्यापि तत्त्वापत्तेः घटाभाववत्वं चेत्सिद्धं भावेनेति चेन्न यत्राधिकरणे भवद्भिरभावोङ्गीक्रियते तत्र तदधिकरणस्यैवाभावत्वा
ङ्गीकारात् न च भेदे आधाराधेयभावानुपपत्तिः घटाभावे घटो नास्तीति प्रतीतेः अभेदेपि तत्पात्र घटाभावे तस्याभावाङ्गीकारात् न चान्यपद घटाभा
वे घटाभावः अनवस्थापत्तेः अप्रसिद्धानुपपादनाच्च अथोच्यते यदि भूतलविशेषो घटाभावः तदा भूतले घटाभावबुद्धिरभावाधारताप्रत्ययो न स्या
त् नहि भूतलं भूतलाधिकरणं भूतले भूतलमिति प्रतीत्यापत्तेः किंच यत्र इदानीं घटमानीतस्तदधिकरणं घटाभावो न वा आद्ये इदानीं घटो नास्तीति
ति प्रत्ययो न स्यात् अन्ये अन्यदापि घटो नास्तीति प्रत्ययो न स्यात् किंच कपाले घटो भविष्यतीति घटो नष्ट इति प्रतीतेः कपाले घटप्रागभावः उ
त्तरकाले घटध्वंसः स हि कपालान्मात्रता सर्वदा तत्प्रतीतिः स्यात् कपालस्य सत्वात् अन्यथा कपालप्रतीतिरपि न स्यात् किंचैवं मोक्षो दुःखाभावा
त्मस्वरूपः स्यात् तथा च साधनापत्तिर्नित्यत्वादिति संक्षेपः स्यादेतत् एवं घटाभावो नास्तीति प्रतीत्या घटाभावाभावोप्यधिकः स्यात् स्यादेवे
ति चेत् तर्हि तदभावोप्यधिकः स्यादित्यनवस्था केवलाधिकरणे तदभावः इति चेत् तर्हि सर्वत्र स एवाभावोस्तु भवदुक्तदूषणगणप्रसंगश्चे
ऽस्यात् अथाहुः घटाभावाभावो घट एव तत्सत्वे घटाभावो नास्तीति प्रतीतेः न केवलाधिकरणरूप उक्तयुक्तेरिति संप्रदायः नव्यास्तु घटाभा
वाभावोऽधिक एव घटभावत्वेन प्रतीतेः न चायं भ्रमः बाधकाभावात् तदभावस्तु घटाभावस्वरूप एव नाधिकरणं तिना नवस्थानमिमाहुः स्यादेतत् भूतले
घटभेदभिन्नं न वा अन्ते आधाराधेय भूतलमेव घटभेदरूपेण नु आद्ये तद्घटभेदोप्यधिकः स्यात् स्यादेवेति चेत् तर्हि तद्भेदोप्यधिकः स्यादित्यनवस्था
अथ अनवस्थाभयाद्भेदो नाधिकः किंत्वधिकरणरूप इति चेन्न भवदुक्तदूषणगणप्रसंगात् अथाहुः भेदभेदोप्यधिक एव न चैवं तद्भेदोप्यधिकः २
स्यादिति वाच्यं चेयमनवस्था दोषाय प्रामाणिकत्वात् तदाहुः सर्वतो बलवती ह्यन्यथानुपपत्तिरिति संक्षेपः स चायमभावो द्वेधा अन्योन्याभा

घटाभावाभावः =

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

घटादिप्रागभावस्तत्रूपस्त्वयर्थः =४

वः संसर्गाभावस्य न चेदमिदं न भवति इदमेतद्भिन्नमिति प्रतीतिसाक्षिकोऽभावोऽन्योन्याभावः यदिदमाहुः तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽ
भावोऽन्योन्याभाव इति तस्मादन्योन्याभावः संसर्गाभावः सोपि त्रिविधः अत्यन्ताभावप्रागभावप्रध्वंसाभावभेदात् तत्र नास्तीत्यत्र भवसिद्धो नित्यः संस
र्गाभावोऽत्यन्ताभावः विनष्ट इति प्रतीतिसाक्षिकजन्यनिमानुभावो ध्वंसः स च न विनाशी तद्धि नाशकल्पने प्रमाणाभावात् नहि विनाशो विनष्ट
इति प्रत्येति कश्चित् तत्प्रागभावस्य घटादिरूपप्रतियोगी तत्प्रागभावस्य उभयत्र ध्वंसीभविष्यतीति प्रत्ययात् विनाशी अभावः प्रागभावः
स च भविष्यतीत्यनुभवसाक्षिकोऽनुत्पन्नः तस्य ध्वंसः प्रतियोगी तद्ध्वंसस्योभूयत्र विनष्टः प्रागभाव इति प्रतीतेः अत्यन्ताभावोऽन्योन्याभावश्च
नित्यो नित्यस्याभावो द्विविधः एकमात्रवृत्तिधर्मावच्छिन्नप्रतियोगिताकोऽन्यश्च न चातेमानाभावः घटत्वेतिद्वयपटेन सः घटेन घटपटौ एकघटव
ति न घटे एको न द्वौ इति प्रतीतेः एकघटवति द्वित्वावच्छिन्नतदत्यन्ताभावस्यैकस्मिन्नुभयान्योन्याभावस्य च सत्त्वात् न च प्रतियोगिमति कथं तदभावः
तयोर्विरोधादिति वाच्यम् प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधात् न चैकत्वावच्छिन्नः एको द्वाविति प्रतीतेः अत एव दण्डिपुरुषो ना…
इत्यपि प्रतीतेः पुरुषे सत्यपि दण्डी पुरुषो नास्तीति धीबलाद्विशिष्टाभावो विशेषणविच्छिन्नविशेष्याभावस्वरूपोऽभ्युपेयते न चेयं दण्डाभावविषयास्त्वपि त
या प्रतीतेः न वा पुरुषाभावविषया तत्सत्त्वे सत्त्वात् तस्माद्यत्र विशेषणाभावो विशेष्याभाव उभयाभावो वा तत्र तौ विशिष्टाभावोऽधिको वसेयः अ
हाल्ल अभावो नेन्द्रियग्राह्यः अभावसन्निकर्षाणामभावात् किं त्वनुपलब्धिरूपप्रमाणगम्य इत्याहुः तन्न प्रमाणान्तरकल्पनातः सन्निकर्षान्तरक
ल्पनाया लघुत्वात् अन्यथा संयोगादीनां रूपादीनां सन्निकर्षाणामभावात् शाब्देऽपि प्रमाणान्तरकल्पनापत्तेः तत्र शब्दं साक्षात्करोमीति प्रतीतेः प्रम
तमेवायमिति चेत् इहापि प्रत्यक्षयामि घटाभावमिति प्रतीतेरस्य तदेव इति तुल्यम् किं चानुपलब्धेः प्रमाजनने व्यापाराभावात् कथं प्रमाकरणत्वम्
व्यापारवद्धि कारणं करणमित्युक्तं न त्वेवं घटाभाववति घटोपलब्ध्यादिविघटाभावप्रत्ययः स्यात् इन्द्रियसंबंधविशेषणतायाः सत्त्वादिति चेत् न
योग्यानुपलब्धेरपि अभावग्रहे हेतुत्वात् अथ केयं योग्यानुपलब्धिः योग्यस्य प्रतियोगिनोऽनुपलब्धिः सहकारिणीति मतम् तन्न जलपरमाणौ
पृथिवीत्वाभावग्रहापत्तेः भवति हि पृथिवीत्वं चेत्तर्हि योग्यं तदनुपलब्धिश्च जलपरमाणौ स्तंभे पिशाचभेदग्रहानुपपत्तेः पिशाचस्य प्रतियोगिनो
ऽयोग्यत्वात् अथ योग्येऽधिकरणे प्रतियोगिनोऽनुपलब्धिः सा इति चेन्न भूतले पिशाचात्यन्ताभावग्रहापत्तेः यत्र अत्यन्ताभावग्रहे योग्यप्रतियो
ग्यनुपलब्धिरन्योन्याभावग्रहे च योग्येऽधिकरणे प्रतियोगितादात्म्यानुपलब्धिः सहकारिणीति मतम् तन्न जलपरमाणौ पृथिवीत्वात्यन्ताभाव

घटध्वंस

प्रतियोगि=

दंडीनास्तीति=

दंडीपुरुषो नास्ती तिप्रतीतेः

तस्मात् ... ... भावः

ननु पश्यामि घटाभावमि
ति प्रतीतिर्विवाद ग्रस्तत्व
... =६

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अन्यत्रापि महत्त्वाभावादावपीत्यर्थः महत्त्वाभावे इन्द्रियसन्निकृष्टोद्भूतरूप
वद्विशेषणतैव योग्यः सन्निकर्षः

उद्भूतरूपाभावग्रहः = ४

मं·री
४

प्रसङ्गापत्तेः वायावुद्भूतरूपवद्देशे घटाद्युपपत्तेश्च नचेष्टापत्तिः अनुभवविरोधात् यत्रोद्भूते योग्यसहकारिसंपत्तौ उपलब्धिः कारणम् अतएवांध
कारेन घटाभावग्रहस्थले तथा नचालोकाधिकरणसन्निकर्षस्यापि हेतुत्वात् नचानलपरमाणौ पृथिवीत्वाभावग्रहः योग्यसन्निकर्षाभावात् कः
सन्निकर्षो योग्यः पृथिवीत्वाभावग्रहे इति चेत् इन्द्रियसन्निकृष्टमहत्त्वोद्भूतरूपवद्विशेषणता उद्भूतरूपाभावे तु इन्द्रियसन्निकृष्टमहत्त्ववद्वि
शेषणता योग्यः सन्निकर्षो नोनमनमिति तद्ग्रहः भवति च महति वायौ एवमन्यत्रापि सन्निकर्षा योग्याः कार्यवशादुन्नेयाः पिशाचाद्यत्यन्ताभावस्य
योग्यत्वान्नग्रह इति कथं तर्हि तदत्यन्ताभावग्रहे योग्यता योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिताकत्वे विशेषणमेव मन्यत्रापि प्रत्यक्षभवा
प्रकारेण योग्यता वाच्या सर्वाभावसाधारणं किं योग्यत्वमिति चेन्न किंचिदिति ग्रहणात् तत्किं नानेत्वाभावे योग्यता इति चेदोमं गुणयोग्यत्वादंगु
तत्सेव तत्त्वादिति संक्षेपः अथ किमिन्द्रियं चक्षुरादि रूपते तैजसमिन्द्रियं रूपग्राहकं महदिन्द्रियं वा चक्षुः वायवीयमिन्द्रियं स्पर्शग्राहकं महदिन्द्रियं वा
त्वक् घ्राणमिन्द्रियं रसग्राहकं महदिन्द्रियं वा रसनं पार्थिवमिन्द्रियं गंधग्राहकं महदिन्द्रियं वा घ्राणम् महत्पदं मनोवारणाय कर्णशष्कुल्यवच्छिन्नं
नभः श्रोत्रं निःस्पर्शमणुमनः निस्पर्शपदं वीणादिवारणाय अणुपदं विभुवारणाय अत्र मीमांसकाः मनोनाणु किंतु विभु निः
स्पर्शद्रव्यत्वात् आत्मवत् मनस्त्वं च आत्मान्यत्वे सति ज्ञानासमवायिकारणसंयोगाश्रयत्वमित्याहुः तन्न विभुत्वे आत्ममनःसंयोगानुपपत्तेः तथा
हि त्रिविधः संयोगः कर्मजः अवयवसंयोगजश्च नच विभोरात्मनः कर्मास्ति मनसोपि तद्वद्विभुत्वात्तस्यापि कर्माभावात् अतः कर्मजसंयो
गासंभवः नच विभोरात्मनः कर्मास्ति मनसोपि तद्वद्विभुत्वात्तस्यापि कर्माभावात् अतः कर्मजसंयोगासंभवः नचानयोरवयवोस्ति येन तत्संयोग
जः संयोगः स्यात् नच नित्य एव विभुसंयोगनिषेधात् अतो निषिध्यत इति चेन्न मानाभावात् संयोगत्वावच्छेदेन जन्यत्वावधारणाच्च अत्र
योजकं वेदेऽनुमानमिति संक्षेपः ॥ इति श्रीमहाचार्यचूडामणिकृतायां न्यायसिद्धान्तमञ्जर्यां प्रत्यक्षपरिच्छेदः ॥ अथोद्देशक्रमानुरोधेनानु
मितिकरणमनुमानम् अनुमितित्वं च प्रत्यक्षमिति मीमांसानुभवसिद्धो जातिविशेषः जन्यज्ञानजन्यत्वाव्यभिचारिजन्यशाब्दभिन्नजन्यत्वाव्यभिचारिजातिमद
नुभवत्वं वा प्रत्यक्षत्ववारणाय जन्यज्ञानजन्यत्वाव्यभिचारीति ज्ञानाजन्ये निर्विकल्पके च तद्दृष्टिजन्यत्वं व्यभिचरति तत्रापि प्रथमजन्यपदे जन्य
त्वात् उपमितित्वशाब्दवारणाय व्यभिचारीमन्ते तेहि ते ज्ञानजन्यत्वव्यभिचारि शाब्दजन्यत्वाव्यभिचारिणी रूपाजातिस्ताह शपदेनोपात्तेत्युपमिती
नां सर्वांशशाब्दविषयकातिरिक्तवावार्थज्ञानजन्यत्वात् ईहादुभवानां च सर्वांशशाब्दज्ञानजन्यत्वात् नच शाब्दज्ञानजन्यत्वाव्यभिचारीति समाप्तक अ

इति देशपदं साहश्यवैधर्म्यान्यतरपरं वैधर्म्यज्ञा
नादप्युपमितिसंभवात् = १

पर्यवेक्षा = २ जन्यतेन
जन्यपदकृती =

प्रत्यक्षत्वे = २ जन्यपीजन्यत्वे = २

चाक्षुषत्वादिवारणाय नेश्वरज्ञानजन्य
त्वाव्यभिचारित्वे ईश्वरज्ञानसाध्यत्वं ईश्वरश्येयात्

उत्प्रेक्षाभिः अर्थ
कार्यमव्य
यम्
न॰

शब्दग्राहकं महत्त्वा

अनुमितित्वं ज्ञानाधी
नमनुमानत्वमनुभूत
मानत्वं ज्ञानाधीनचेत्यनु
मितित्वज्ञानमिति ध्यानाधीना
त्रयोपि त्रयः
नित्ये ईश्वरज्ञाने=
व

न्यति
न हेतिवर्तमान निरूपण
विषयी न तत्र्येवं जन्यमाना
जन्यजन्यत्वाव्यभिचा
रिलेन च त्यात्रेत्रेचा
तत्पत्वमुनन्यत्वत
दिज मतायाभि
चारित्वान्नातिव्या
प्तिरतो जन्यज्ञानेति =
५

प्रत्यक्षनिरूपणेन विभिः प्रत्यक्षत्वज्ञानान्य प्रत्यक्ष जिज्ञासा निवृत्तौ समयामनुपपत्तेः कथं तदनुमाननिरूपणमिति भावः अवसरस्य प्रतिबन्धकीभूतप्रमाजिज्ञासा निवृत्तौ सत्यामवश्यवक्तव्यत्वमिति =
न च उमितान्तरभेदसाधनेनानुमितित्वस्पष्टतावच्छेदकतया हेतुत्वासंभवः स्यात् आह जन्येति = ४ अन्यथा ऽनेनैव सिद्धेरनुमितिकरणमित्यर्थः कस्यानुमितिकरणमनुमानमिति त्वासाधारणं कारणमित्या
ग्राह वाधाजन्यत्वं स्यादत आह जन्येति = ४

प्रतुमितित्वस्य स्वीयशाब्दत्वानन्तत्वाव्यभिचारित्वेनासंभवात नचमोदजनकत्वावच्छेदकं तत्वत्वान्नवृत्तिसामान्यंजन्यत्वानजन्यमात्रवृत्तीयतिव्याप्तिः
तस्यशाब्दविशेषविषयकमननजन्यमात्रवृत्तित्वेनजन्यशाब्दत्वानजन्यत्वाव्यभिचारित्वात जातिपदं मानसाद्यवृत्तिजातिपरं तथात एवभक्तिशुद्धादेर्वृत्ता
सः अनुभवपदं तस्य निवारणायइतिदिक् ननु किमिदं तत्करणमिति चेत् व्याप्तिविशिष्टपक्षधर्मतावत्कलबुधपदार्थज्ञानमिति तिष्ठताम नन्वकेयं
व्याप्तिः नतावत्साध्याभावाभाववद्वृत्तित्वम् पर्वतीयवह्न्यभावाभाववतिमहानसादौधूमस्यसत्वात नचसाध्यवदन्यावृत्तित्वम् वह्निमत्पर्वतान्यत्व
त्वरहितत्वाद्धूमस्य अथसाध्यवत्तावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वविवक्षितम् नचधूमवतिवह्निमत्सामान्याभावच्छिन्नाभावोवर्तते धूमवान्वह्नि
मानित्यप्रतीतेरितिचेन्न केवलान्वयिसाध्यकाव्याप्तेः अत्रमीमांसकाः केवलान्वयिसाध्यकानुमानमेवनकेवलान्वयस्याप्यवकाशस्ताङ्गः तत्र यद्धेय
वत्वमनुमिनोमीत्यनुभवापलापापत्तेः नचकारणबाधात्भ्रान्तिरियं व्यभिचारेणतद्धेतुःकारणत्वासिद्धेः सोयमालोकेवलान्वयिविसाध्यवर्तलौकि
मेवासतस्त्वाप्तिसिद्धेरतद्वृत्तिवस्तानादेवानुमितिरितिमात्रः तत्र असत्वाभावोनेरसिद्धेः किंच तेपत्वसाध्यकेवल्यमत्वाभिसिद्धौसानवलौकिमतयेयम्वह्निरि
त्यत्र अयेत कालिकेनसंबंधोव्याप्तिरिमाङ्गः नन्ववहेति कोयंकालिकेनसंबंधः केनसाध्येनहेतोःसंबंधःकस्यहेतोःसाध्यसामानाधिकरण्यस्य क
स्वहेतनतिसाध्यत्वेवा नाद्यः अप्रसिद्धानुमानेव्याप्तेः नहिधूमस्यकलवह्निसामानाधिकरण्यमस्ति अथः विंशीयवह्नेःसामानाधिकरण्याभावात नद्वितीयः
एकव्यक्तिकेसमावव्याप्तेः नतृतीयः एकमात्रवृत्तित्वेनाव्याप्तेः अथोच्यते साधितसामानाधिकरण्यविशिष्टसमानाधिकरण्याचकत्वं व्याप्तिः यत्समानाधिक
रण्ययोवतोवह्निसामानाधिकरण्यविशिष्टमेववह्निव्याप्तिः नतवह्नेर्धूमस्य नहिवह्निसमानाधिकरण्याचतोधूमसमानाधिकरणाः अथःविंशस्वा
ह्निसमानाधिकरणस्यधूमसमानाधिकरणत्वात यद्विशिष्टसमानाधिकरण्यावृत्ताः साध्यतावच्छेदकावच्छिन्नसमानाधिकरणस्तद्वत्वंवा तेनद्रव्यं
गुणकर्मान्यत्वविशिष्टसत्ताविरहविशिष्टसत्तायाअतिरिक्तत्वेपिनक्षतिः नवागुणकर्मान्यत्वविशिष्टसत्तावान्जातेरितिवत् भवतिचधूमत्वविः
शिष्टसमानाधिकरणयावतोवह्निसमानाधिकरणस्तद्वत्वंधूमे नवह्नेःधूमंप्रतिवह्निमत्वम् नातोवह्नेर्धूमव्याप्तिः अस्तिचेदंकेवलान्वयिनि
अभिधेयत्वंविशिष्टसमानाधिकरणयावतोप्रमेयत्वसमानाधिकरणत्वात एतेनसाध्यवासाध्यवदन्यावृत्तित्वेसतिसाध्यसमानाधिकरणत्वंव्या
प्तिः नचेदंकेवलान्वयिन्यव्याप्तिः तेनेदमनुमानमितिमीमांसकमतमपास्तम् नतोप्यसलत्तुत्वात अत्रचार्वाकाः भवतत्वंव्याप्तिर्नचेयंशाकाप्रत्य
किंविधूमसमानाधिकरणंवह्निसमानाधिकरणमभविष्यतीतिशंकायाअनुवर्तमानत्वात नचेदशंकायांव्याप्तिनिश्चयोभवितुमर्हति तस्मात्प्रतिबंधक
त्वात नचप्रयोरर्शनात्तन्निवृत्तिःशतशःसहचरितयोरपिव्यभिचारोपलब्धेः नचतर्कात्तन्निवृत्तिः तर्कस्यव्याप्तिनिश्चयमूलकत्वेनानवस्थानात अन्य
यावन्नःसाध्यसमानाधिकरणस्तत्वंव्याप्तिरितियावत् भवतिचधूमसमानाधिकरणं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स व्यभिचारिस्थले व्यभिचारज्ञानविरहादिरूपा इयं सिद्धा ज्ञानविरहादिस्वरूपा ...

तन्नु महानसीयधूमनिष्ठव्याप्तेर्महानसीयवह्निसामानाधिकरण्यरूपत्वेन ... पर्वतीयधूमेभानाङ्गीकारे ...

पर्वतीयधूमे ... व्याप्त्यभावनिश्चयादिरूपबाधके ॥ ४

स ... विशेषदर्शिनां कथमनुमितिरत आह यद्वेति ॥ ४

च यावदकाभावाद्याप्तेरग्रहे कुतोऽनुमानं स्यादिति उच्यते व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनमेव व्याप्तिग्राहकम् न च तर्कं विना विरहोऽदुःशकः क्वचित्तर्कं विना क्व

चिन्महानसीयधूमे ... कोटिस्मरणाद्यभावादपि ... व्यभिचारशंकाकोटिस्मरतिर्व्याप्तिग्रहो भवतीति दिक् ननु सर्वं व्याप्तिर्दृष्टान्तवह्निधूम

स्थलीनानवहीय ... अनुमितिः ... व्याप्तिग्रहस्तदानुमितिरेव नास्तीति चेदत आह यद्वा व्याप्तिर्दृष्टान्तवह्नि हेतोर्धूमत्वेन महानसीयपर्वतीयधूमसं

ग्राह्यते ततो विशेषणज्ञानेऽनुपातिस्मारसतिबाधके व्याप्तिविशिष्टत्वेन पक्षधर्मधूमस्य ज्ञानं जायते यद्वा दृष्टान्ते व्याप्तिज्ञाने जायमानं धूमत्वरूपसामान्यलक्षण

प्रत्यासत्त्यात्मकलधूमगोचरमेव जायते इत्यदोषः न च सामान्यलक्षणप्रत्यासत्तिर्दोषग्रस्ता ... विशुद्धितत्त्वयुक्तसा ... धूमत्वेन सकलधूमसा

नाकारः स्यादिति चेन्न यत्साक्षात्प्रत्यासत्तिलक्षकाभावकृतज्ञाप्यलौकिकसाक्षात्कारत्वेनैकसीमया ... प्रत्यासत्तेः सहकारित्वात् ननु व्याप्तिज्ञा

नस्यानुमितिहेतुत्वे यत्र धूमो वह्निव्याप्य इति ज्ञानं तत्रापि स्यादनुमितिः स्यात् न च पक्षवृत्तिधूमे व्याप्तिज्ञानं कारणं तच्च ज्ञानमस्तीति वाच्यम् धूमत्वेन सामान्यल

क्षणप्रत्यासत्त्या सर्वधूमे व्याप्तिज्ञानात् न च हेतोः पक्षधर्मताज्ञानमपि सहकारीति वाच्यम् धूमो वह्निव्याप्यो धूमवांश्च पर्वत इति ज्ञानादप्यनुमित्याप

त्तेः इष्टत्वे न तद्रूपेण पर्वते धूमस्य ज्ञानस्य सत्त्वात् इष्टत्वे व्याप्यत्वेन प्रकारेण पक्षे हेतोर्निश्चयोऽनुमितौ हेतुर्न तु व्याप्तिज्ञानमात्रम् न च धूमो वह्निव्याप्योऽयं धूमः पर्वते

तद्वृत्तीति ज्ञाने व्याप्यत्वेन पर्वते धूमस्य ग्राहकत्वेन ततोऽनुमितिः स्यात् पर्वतो वह्निव्याप्यधूमवानित्यवान्तरसंशयादनुमितिर्नाभूदतः इति निश्चयपदम् मी

मांसकास्तु व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं व्याप्तिज्ञाने सहकारि व्याप्यतावच्छेदक[illegible]धर्मवत्तद्रूपेण व्याप्तिग्रहणात् न तु इयान्तरं नातो इयो

पर्वतवृत्तीतिज्ञानादनुमितिः एवं च धूमो वह्निव्याप्यो धूमवांश्चायं तत्त्वान्यथादप्यनुमितिरित्याहुः तत्र व्याप्यत्वप्रकारकपक्षधर्मताज्ञानहेतुतायां लाघ

वात् किं च एवं च वह्निव्याप्यवानिति ज्ञानादनुमितिर्न स्यात् धूमत्वेन पक्षधर्मताज्ञानग्रहणात् तस्माद्वह्निव्याप्यवानित्येवं रूपव्याप्तिविशिष्टपक्षधर्मताज्ञा

नात्तृतीयलिङ्गपरामर्शात्मनः प्रसिद्धादेवानुमितिः तृतीयत्वं कथमिति चेत् प्रथमं दृष्टान्ते धूमदर्शनं ततो व्याप्तिभानं ततः स्वहितिशिष्टपक्षधर्मताज्ञानमित्येवं तृतीय

तेति स्वहाण तृतीयत्वं प्रायिकमित्युक्तम् न तु तेन रूपेण हेतुत्वं गौरवात् व्यभिचाराच्चेति ध्येयं सोऽयं परामर्शो नानुमितिः करणं व्यापाराभावात् नापि

समस्यमाणलिङ्गं परामर्शव्यापारकम् अतीतभाविनोऽलिङ्गयोर्भिन्नमितिजनकतापत्तेः अनन्यथासिद्धनियतपूर्ववर्तित्वं हि कारणत्वम् किं तु व्याप्तिसाधक्या

नेवालिङ्गज्ञानं वा ज्ञानमात्रं वा परामर्शव्यापारकम् न चातिप्रसंगः व्यापारेणानतिप्रसात् ज्ञानपदेऽनुमितिमुख्यकं मात्रपदस्य नातः स्मरणात्मक

परामर्शस्थले व्यभिचारः तत्र व्याप्तिविषयकसंस्कारस्य परामर्शव्यापारकस्य करणत्वात् एवं चानुभवपदं व्यर्थमित्यत्र केचिन्मतिमिति संक्षेपः तच्चानुमानं त्रिविध

केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् तत्र केवलान्वयि यथा अभिधेयत्वे यत्तत्पदमेयत्वादिति अभिधेयत्वं च भगवद्रिच्छारूपशहशक्तिविषयत्वम् तच्च सर्वत्रैवेत्यतः सर्वत्रैव भगवदिर

व्यापारके तत्त्वकल्पने न व्यापारसंबन्धे न साध्यादिनानपदे तत्त्वकल्पने न वा ॥ २

वलव्यतिरेकिमन्वयव्यतिरेकिभेदात् तत्र केवलान्वयिसाध्यकमनुमानं केवलान्वयि तत्र योधर्मः सर्वत्र वर्त्तते स ॥ ४२

केवलान्वयिसाध्यकानुमितिसाधनकमनुमानमित्यर्थः ॥ १

पक्षकोटौ व्याप्यतावच्छेदकप्रकारकत्वादव्यवच्छेदः ॥ १

मं॰ टी॰
५

तत्र सामानाधिकरण्या ... ज्ञानात् ॥ २
विशेषदर्शिनामनुमि
त्यनुमितिरतः ॥ ५

ननु यत्र धूमो वह्निव्या
प्यो धूमवांश्चायं तत्रैति
ज्ञाने तत्र भवत्यनेन व्या
प्यत्वप्रकारेण पक्षे
हेतुनिश्चयकल्पने न
... इति
...
तदिति ... परामर्श
स्थले व्याप्यतावच्छेदक
प्रकारकपक्षधर्मता
...
...
साध्यविषयकत्वम् ... ॥ ५
हेतावाह सर्वत्रेति ॥ २

द्विः ॥
सामान्यप्रत्यासत्त्या ज्ञाने
जननीयः ॥

तत्र व्याप्यतावच्छेदकप्रकारक
पक्षधर्मताज्ञानहेतुत्वे ...
लाघवस्यमनस्तात् ॥

स्मरणात्मकपराम
र्शस्थले ...
... व्यापारः ...
...
... विशेषविशे
...
... मिति ...
...

व्यापारादिति साध्यज्ञानं तिनापि व्यतिरेकव्याप्त्यारमर्श पराम
र्शानुमितिदर्शनादिति लिङ्गज्ञानमिति लाघवादिति अनुमाना
न्तरं ... नतु नानतिप्रसंगेति केवलसाध्य
ज्ञानके वलहेतुज्ञानवत्यादिज्ञानकाले ऽनुमितिप्रसंगस्यार्थः ॥

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नत्वः भियेयत्वं न भगवदिच्छारूपशक्तिविषयत्वं शब्दशक्तेर्भगवदिच्छारूपत्वाभावात् न च शब्दशक्तेर्भगवदिच्छारूपत्वे किं बाधकमिति वाच्यम् गंगापदस्य तीरे शक्तत्वप्रसंगात् किन्तु निरुक्तश
क्तिविषयत्वमतिरिक्तं शब्दशक्त्याश्रयत्वपर्यवसन्नं तच्च न सर्वत्रैक शक्यतावच्छेदकशक्यतावच्छेदकयोर्भेदेन भिन्नत्वात् केवलान्वयि इति=६ इत्यभावप्रतियोगी वा इत्याकारक
विशिष्टबुद्धेरूपत्वे च शक्तेः शक्तित्वग्राहकत्वात् शक्त्याश्रयप्रसंगात्। इतरभेदाभावव्यापकीभूताभावप्रतियोगि पृथिवीत्वं तात्त्विनेतरभेदाश्रयस्तदर्थः=६ सहचाररूपविषयाभावान्न निश्चयः=
न तु पक्षातिरिक्तजलादौ साध्यसाधनयोः सहचारस्य सत्त्वेऽपि प्रमात्मकनिर्णयः संभवत्येवेति स्यात् निश्चीयते वेति=७ ॥ १३

ज्ञानविषयत्वात् वैलक्षण्यदर्शकाभावाच्च एवं ज्ञेयत्वं ज्ञानविषयत्वम् तच्च सर्वत्रैवास्ति सर्वस्यैव भगवद्ज्ञानविषयत्वात् एवं प्रमेयत्वं प्रमाविषयत्वं तच्च सर्व
त्रैवर्तते सर्वस्यैव भगवत्प्रमाविषयत्वात् अत्र केचित् यत्र साध्यनिश्चयोऽस्ति तत्रानुमितेरनुत्पत्तेः एतावनुमितेरंगं सा च साध्यवत्त्वेन संदिह्यमानत्वं
न च प्रमेयत्वेन संशयो भवितुमर्हति व्यतिरेकव्यक्तेरप्रसिद्धेः अतः कथमिदमनुमानमिति तन्न सिसाधयिषाविरहविशिष्टसाध्यनिश्चयाभावो हि
पक्षता सा चेहाप्यस्ति न तु संशयः संशयं विनाप्यनुमितेरानुभविकत्वात् साध्यनिश्चयेसत्यपि अनुमित्सायां सत्यामनुमितेरुत्पत्तेः तत्र पक्षतासंप
न्नेयं विशिष्टा ते तत्र सिसाधयिषासहितसाध्यनिश्चयोऽस्ति न तु तद्विरहसहित इति संक्षेपः असत्सपक्षः केवलव्यतिरेकी तत्त्वं च पक्षातिरिक्तः निश्चित
साध्यसाधनसहचारिकत्वं यथा हि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् यन्नेतरेभ्यो भिद्यते तन्न पृथिवी यथा जलं नैवं चेयं पृथिवी तस्मादितरेभ्यो भि
द्यत इति व्यतिरेकिण्युदाहरणमिति न च पक्षातिरिक्ते जलादौ साध्यसाधनयोः साहचर्यमस्ति निश्चीयते वा न चाऽनिश्चितसाध्यकत्वमेव सपक्षत्वं घटादौ
साध्यस्येतरभेदस्याप्रसक्ततया निश्चितत्वात् अन्यथा साध्याप्रसिद्धौ हेतुरवृत्तिर्व्याप्तिनिरूपणानापत्तेः न च हेतौ साध्यनिश्चये तस्य कथं पक्षत्वमिति वा
च्यम् पृथिवीत्वावच्छेदेन साध्यनिश्चयस्यैव तदवच्छेदेन पक्षताविरोधित्वात् न चेह सोऽस्ति सर्वत्र पृथिव्यां तन्निश्चयाभावात् अत्र व्यतिरेकसहचारा
त् उक्ता व्याप्तिर्गृह्यत इति प्राञ्चः साध्याभावहेत्वभावयोर्व्याप्तिग्रहाद्नुमितिः न चान्यव्याप्तिग्रहादन्यथमन्यानुमितिरिति प्रसंगादिति वाच्यम् सा
ध्याभावव्यापकीभूताभावप्रतियोगित्वेन पक्षधर्मतानिश्चयः साध्यावगाहकमभ्युपगमादिति नव्याः इत्थमन्वयव्यतिरेकिविषयाश्च सिद्धा अनुमान
मिति संक्षेपः एवं हेतवः सिद्धास्तेषामाभासा निरूप्यन्ते तत्र सव्यभिचारविरुद्धसत्प्रतिपक्षितासिद्धबाधिताः पंचैव हेत्वाभासाः सव्यभिचारस्त्रिविधः
साधारणोऽसाधारणोऽनुपसंहारी च तत्र साधारणत्वं साध्यवदन्यवृत्तित्वं यथा धूमवान् वह्नेरित्यत्र धूमवदन्यस्मिन्नयोगोलके वह्नेः सत्त्वात् साध्या
समानाधिकरणसमानाधिकरणत्वं वा भवति हि धूमासमानाधिकरणं यदयोगोलकवृत्ति तत्समानाधिकरणो वह्निः साध्यव्यापकीभूताभावप्र
तियोगित्वमसाधारणत्वं इदमेव सपक्षव्यावृत्तत्वं गीयत इति उदाहरणम् नित्यः शब्दः शब्दत्वादिति शब्दत्वं हि नित्यत्वव्यापकीभूतशब्दत्वाभावप्रति
योगि न चानित्यः शब्दः शब्दत्वादित्यत्र व्याप्तिः तस्य संदेहत्वात् एतज्ज्ञानेन सा व्याप्त्यनुमितिप्रतिबंधके व्यतिरेकि सत्प्रतिपक्षरूपत्वात् न चैवं स
त्प्रतिपक्षत्वमिति वाच्यम् हेतुभेदस्यैवतत्स्वांगीकारात् कथमस्य व्यतिरेकि सत्प्रतिपक्षरूपतेति चेत् कलय शब्दत्वादिनान्वयी हेतुः किन्तु व्यति
रेकी तथा च नित्यत्वाभावव्यापको यः शब्दत्वाभावस्तत्प्रतियोगि तथा यथा साध्यं साधयेत् तथा नित्यत्वव्यापकीभूताभावप्रतियोगितया सा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

संप्रत्यपि त्वं पक्षे विरुद्धत्वं परस्परप्रतिबध्यकमेव नित्यत्वाभावव्याप्यकत्वाभावप्रतियोगिपाठत्वं नित्यत्वानुमितौ प्रतिबंधकं अनित्यत्वाभावरूपनित्यत्वव्यापकत्वाभावप्रतियोगित्वं च नित्यत्वानु
मितौ प्रतिबंधकमिति भावः न च विरुद्धयोर्द्वयोरेकत्र निर्णयात्मकानुमित्यसंभवे पि संशयात्मकानुमितिसंभवात् तत्पुरस्सरप्रतिबंधकत्वे नेति वाच्यम् परोक्षज्ञाने निश्चयात्मकत्वे नियमात् =१ साध्याभावव्यापकत्वं येन सा
ध्याधिकरणे हेतुतावच्छेदकसंबंधेना हेतुमिति परामर्शः तेन कालिकसंबंधेन तो ताधिकरणे स्वसमवायेन हेतौ तेपि समवायेन ताधिकरणेच कालिकसंबंधेनास्तुत्वहेतौ तिपि त्वं इत्यादौ विरुद्धत्वहानिः =२
तो शब्दादिस्थले साधारण्यासाधारण्ययोः सत्त्वेपि उपाधीनां विरुद्धत्वासाधारणत्वमाधारणत्वानां भेदात् भेदः विरुद्धासाधारणासाधारण्यइति व्यवहारभेदः =३

परस्परप्रतिबंधात्

मं॰ टी॰ ६

ध्याभावमपि साधयेत् न च हेत्वोर्विरुद्धयोरेकत्र निर्णयः किं तु परस्परप्रतिबंधात् द्वयोरेवानिर्णय इति ध्येयम् यत्र हि साध्ये हेतुमत्तरत्वं स एव हि साधक। त्वेवा अनुपसंहारित्वं यथा काशवान् धूमात् दिशो वा अस्याप्तो साध्यासमानाधिकरणत्वं विरुद्धत्वम् न यथा गोरश्वत्वादिति यद्यपि ग्रामसाधारण त्वमेवास्ति साधारणत्वं च तथापि उपाधिभेदाद्भेदः पक्षे साध्यधीप्रतिबंधकः परामर्शः सत्प्रतिपक्षः यथा जलमुष्णं स्पर्शवत्वादित्यादौ तेजस्त्वम तेजस्त्वादित्यादि असिद्धित्वं व्यभिचाराद्यन्यपरामर्शप्रतिबंधकतावच्छेदकधर्मवत्त्वं सा च त्रिविधा स्वरूपासिद्धिराश्रयासिद्धिर्व्याप्यत्वासिद्धिश्च पक्षे हेत्वभावः स्वरूपासिद्धिः यथा घटः पृथिवी पटत्वादित्यत्र घटरूपपक्षे हेत्वभावः पक्षे पक्षतावच्छेदकासिद्धिराश्रयासिद्धिः गगनकमलं ह रमिकमलत्वादित्यत्र कमले पक्षे गगनीयत्वाभावः एतदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः यथा पृथ्वीपटले धूमविश्वव्याप्यभावः साध्याप्रसिद्धि र्हेत्वप्रसिद्धिर्वा पक्षे साध्यस्य न्यत्वबाधः यथा जलादिपक्षे वह्न्यभावः न चास्य धूमस्य हेतोरसिद्धिरेवास्तीति मपव हि दोषोस्तीति कृतं बाधेनेति वाच्यम् असिद्धिर्हि परामर्शप्रतिबंधकतया दोषः तथा च यत्र धूमात्मकपरामर्शो जातस्तत्र व्याप्यमनुमितेरनुत्पत्तेः बाधस्यानुमितिप्रतिबंधकतया दोषत्वा त् यद्यत्कालावच्छिन्नो यदा दोषवान् पृथिवीत्वादिः स्याद्यत्कालावच्छेदेन ह्रदे रूपाभावरूपबाधस्थले दोषांतराभावाच्च नहि पृथिवीत्वेन रूपव्याप्तिः पक्षग्रहमितावेतिदिक् ननूपाधिरपि हेत्वाभासान्तरं संभवतीति कुतो नेमे पंचैवेति चेन्न व्यभिचाराद्यन्यतमत्वं हि हेत्वाभासत्वं न चोपाधिरस्त दन्य तम इति तस्यानेवं भूतत्वात् अतएव सिद्धसाधनमपि न हेत्वाभासान्तरं ननु कोयमुपाधिः तत्राचार्याः साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपा धिः तद्व्यापकत्वं च तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वम् साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्वम् यथा धूमवान् वह्नेरित्यत्र आर्द्रेन्धनम् भवति हि तत्साध्यव्यापकं धूमसमा नाधिकरणस्यात्यन्ताभावस्य तत्समानाधिकरणत्वात् भवति च साधनाव्यापकं वह्निमदयःपिण्डे तदसत्वात् सद्धेतौ तु नैवं तत्र हेतोः साध्यव्याप्यत्वात् साध्यव्याप्यव्यापकस्य च साधनाव्यापकत्वात् प्रत्रेदेति इदं साधनावच्छिन्नसाध्यव्यापकेऽव्याप्तं यथा काकः श्यामो मित्रातनयत्वात् इत्यत्र शा कपाकजत्वं न हि तत् श्यामत्वव्यापकं श्यामत्ववति घटे असत्वात् किं तु मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं यत्र यत्र मित्रातनयत्वावच्छिन्नश्या मत्वं तत्र तत्र शाकपाकजत्वस्य सत्वात् श्यामसाधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं विवक्षितमिति चेन्न वायुःप्रत्यक्षः। प्रमेयत्वादित्यादौ पक्षधर्मवहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापके रूपवत्त्वादावुपाधावव्याप्तेः नहि प्रमेयत्वरूपसाधनावच्छिन्नसाध्यव्यापकं तद्घटात्मादौ असत्वात् किं तु वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकं यावतित हेति घटादौ रूपसत्वात् पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वे वि

वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्ववति॥१

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

[illegible commentary]

वतित्वमितिचेन्न यथोक्तस्थले शाकपाकजत्वेऽव्याप्तेः नहि तत्र तत्त्वेतिधर्मावच्छिन्नसाध्यत्वेऽव्यापकम् तथाविधपक्षमात्रवृत्तिपदेऽसत्वात् अथ यत्किं-
चिद्धर्मावच्छिन्नत्वव्यापकत्वं विवक्षितम् स च धर्मः क्वचित्साधनं क्वचित्तद्धर्मः स इति चेन्न पर्वतो वह्निमान् धूमादित्यत्र महानसत्वाभावस्याप्युपाधित्वाप-
त्तेः भवति हि महानसान्यत्वरूपयत्किंचिद्धर्मावच्छिन्नवह्निव्यापको महानसत्वाभावः यावन्महानसवह्निमति सत्वात् न च पक्षव्यापकः धूमवति म-
हानसेऽसत्वात् अथोच्यते स्वानधिकरणसाधनाधिकरणवृत्तियत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वमुपाधित्वं यद्वा स्वावच्छिन्नानधिकरणसाध-
नाधिकरणवृत्तियत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्वैकल्पेन न च स्वावच्छिन्नानधिकरणे हेतुमन्निष्ठयत्किंचिद्धर्मावच्छिन्नसाध्याधिकरण-
वृत्तियावद्धर्मा यद्धर्मावच्छिन्नसमानाधिकरणत्वं भवति हि आर्द्रेन्धनत्वावच्छिन्नानधिकरणे हेतुमन्निष्ठस्वत्वावच्छिन्नधूमाधिकरणनिष्ठयाव-
न्तो धर्मा आर्द्रेन्धनत्वावच्छिन्नसमानाधिकरणास्तत्र तत्त्वार्द्रेन्धनमुपाधिः एवं रूपत्वावच्छिन्नानधिकरणश्यामत्वसमर्थो ... वह्निवृत्तिईश्वरत्वावच्छि-
न्नरूपत्वाधिकरणं यन्निष्ठायावन्तो धर्मा रूपत्वावच्छिन्नसमानाधिकरणास्ततो रूपवत्त्वमुपाधिः एवं शाकपाकजत्वावच्छिन्नानधिकरणं यन्मित्रात-
नयत्वव्याप्तिसिद्धिशाकान्यपत्वावच्छिन्नश्यामत्वाधिकरणं यन्निष्ठायावन्तो धर्माः शाकपाकजत्वावच्छिन्नसमानाधिकरणास्ततः शाकपाक-
जत्वमुपाधिः न चैवं सद्धेतोः संभवति नहि महानसत्वाभावत्वावच्छिन्नानधिकरणं यद्धेत्वधिकरणं महानसं तन्निष्ठधर्मवह्न्यधिकरणमहानस-
दिनिष्ठायावन्तो धर्मा महानसत्वाभावत्वावच्छिन्नसमानाधिकरणा महानसत्वस्यैवाभावात् अत एव सद्धेतौ पक्षेतरत्वं नोपाधिः पक्षमात्रवृत्तिधर्मे-
ण तत्समानाधिकरणत्वाभावादिति संक्षेपः तच्चानुमानं परार्थं न्यायसाध्यकम् न्यायश्च प्रतिज्ञादिपञ्चकसमुदायः यथा पर्वतो वह्निमान् धू-
मात् यो यो धूमवान् स वह्निमान् यथा महानसं वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानिति नव्यास्तु ... पर्वतो वह्निमानिति शाब्दज्ञानत्वावय-
वविभाजकोपाधिमत्वं प्रतिज्ञात्वं ... शाब्दज्ञानजनकशब्दोपाधिमत्वं हेतुत्वं
पक्षो धूमवान् सोऽग्निमानिति शाब्दज्ञानजनकशब्दोपाधिमत्वमुदाहरणत्वं ... धूमवानयमिति शाब्दज्ञानजनकशब्दोपाधिमत्वमुपनयत्वम् त-
स्माद्वह्निमानिति शाब्दज्ञानजनकशब्दोपाधिमत्वं निगमनत्वम् अवयवत्वं च प्रतिज्ञाद्यन्यतमत्वम् उक्तं च अवयवाः पञ्च प्रतिज्ञाद्याः इति ॥ इ-
ति श्रीमहाचार्यचूडामणिकृतायां न्यायसिद्धान्तमञ्जर्यामनुमानपरिच्छेदः २ ॥ अथोपमानं निरूप्यते तत्रोपमितिकरणमुपमानम् उप-
मितित्वं च उपमिनोमीत्यनुभवसिद्धो जातिविशेषः शक्तिविषयकत्वव्याप्यो जातिमत्त्वरोहितत्वं वा अनुमित्यादिवारणाय जातिमत्वेन अव

सम्प्रुपाधितेनाभिमतम् = ४

पर्वतनास्तक =

समुपाधितावच्छेदकतेनाभिमतम् =

प्रकृतविषयसर्गः =

[illegible commentary]

CC-0 Dharmartha Trust J&K. Digitized by eGangotri

मं॰ सी॰
१७

मितित्वादीनां वह्निमानिति ज्ञाने शाब्दविषयकत्वव्यभिचारित्वात् आवरणवारणाय पदोत्तरपदे प्रत्यक्षान्यपरं नत्वपमितित्वमेव कथं शाब्दविषय-
कत्वाव्यभिचारीति चेदुच्यते उपमितिर्हि पदवाच्यत्वविषयिका न च पदमविषयीकृत्य तद्वाच्यत्वं विषयीकर्तुमर्हति पदे च शाब्दात्मकमित्युपमि-
तेः शाब्दविषयकत्वनियमः ननु स्वयमुपमयत इति चेत्सादृश्यमात्रानादिति गृहाण तथाहि सामान्यतो गवयपदवाच्यं किंचिदस्तीति जाननतो विशि-
ष्टायपविज्ञानः कीदृशो गवयपदवाच्य इति किंचित्पृच्छति तेन च गोसदृशो गवयपदवाच्य इत्युक्तः स च विपिनमनुसरन् यदा गोसदृशं पिंडमनु-
भवति तदा पूर्वानुभूततादृगतिदेशवाक्यार्थस्मरणसत्वरितं जानाति अयं गवयपदवाच्य इति सेयमुपमितिर्नाम न चेयं तत्र प्रत्यक्षं चक्षुरादिव्यापार-
विरामेपि जायमानत्वात् न चानुमानं ततो विलक्षणतयाऽनुभूयमानत्वात् अन्यथानुमितेरप्यभिमानसत्वापत्तेः नाप्यनुमितित्वाभिमतानामभावे
प्युत्पत्तेः नापि शाब्दं गवयत्वविशिष्टस्य उपस्थापकपदाभावात् उपमितावयं गवयपदवाच्य इत्याकारिकायां गवयत्वावच्छेदेन गवयपदवाच्य-
त्वावगाहनात् न तु गोसादृश्यावच्छेदेन तस्यागोरवेलानवच्छेदकत्वात् अन्यथा प्रतीतिमलव्यवहारप्रसंगः न चास्मत्तिरियं सर्वमननुभवात् अ-
तो नित्तिकेवेयं तस्याः करणं सादृश्यविशिष्टे तत्पदवाच्यत्वरूपवाक्यार्थानुभवस्तत्स्मृतिर्वायं गवयत्वादिरूपावच्छेदकविशिष्टसादृश्यज्ञानं यत्र तत्र-
दकारीतिसंप्रदायः न चोपलक्षणम् वैधर्म्यज्ञानादप्युपमितिरुत्पत्तेः यथा कीदृशी पृथिवीति शिष्येणापृष्टे जलादिवैधर्म्यगुणवती पृथिवीति गुरुणो-
क्ते वित्तः स च यदा जलादिविधर्मगुणवतीमिमननुभवति तदा तद्वाक्यार्थस्मरणसहायोपमितिरुत्पद्यते इयं पृथिवीपदवाच्येति एवं गंधवती पृथिवी-
त्युक्तेपि ज्ञेयम् तस्मात्तयोः किंचिद्धर्मविशिष्टे विशिष्टाविदितसंगतिकपदवाच्यतारूपवाक्यार्थानुभवः करणं किंचिद्धर्मविशिष्टे तद्धर्माधीनतत्सह-
कारिलीयद्वाचसम्पाविलक्षणधर्मतत्स्फुरत्त्वरूपधर्मविशिष्टरूपवत्सादृश्यादिज्ञाने जायते तदा तदवच्छेदेन वाच्यतानुग्रहो जायते परं तत्र भ्रमो गोरवेला-
बाधादिति संक्षेपः ॥ इति श्रीभट्टाचार्यचूडामणिकृतायां न्यायसिद्धांतमंजर्यामुपमानपरिच्छेदः ३ ॥ अथ शब्दो निरूप्यते तत्र च शाब्दप्रमितिक-
रणं शब्दः शाब्दत्वं च शाब्दयामीत्यनुभवसिद्धो जातिविशेषः न च पक्षधीजन्यत्वव्यभिचार्यनुभवत्वव्याप्यजातित्वं वसतिपदविषयकत्वा-
व्यभिचारिजातित्वपर्याप्तिर्वा सर्वं तत्र प्रत्यक्षानुमितिस्मृतीनां वारणाय तत्र तादृशीनां प्रत्यक्षत्वादीनां जातीनां सत्वात् जातित्वपक्षमनुभवत्वा-
व्याप्यजातित्वं च संभवति अनुभवत्वादीनां तद्व्यापकत्वात् सत्वात् पक्षधीजन्यत्वव्यभिचारिजातित्वमपि तथात्वात् गन्धानुभवत्वा-
दीनां सत्वात् पक्षधीजन्यत्वव्यभिचार्यनुभवत्वव्याप्यजातित्वं च अनुमितावपि ॥ अतः प्रत्यन्नोत्तरम् तज्ज्ञानं तत्त्वादिव्याप्तिवारणाय पदधीपदम् सोयं शब्दः

सादृश्यवैधर्म्यान्यतरविशिष्टे

गवयत्वादि-

गौ॰
१७

एतादृशीजातिरुपमितित्व गवयपदवाच्यत्वोपमितेः पदविषयकत्वात् शाब्दत्वापत्तेरपि शाब्दविषयकत्वाभावात्॥२

अनुमितित्वस्य गवयपदधीजन्यत्वाव्यभिचारित्वात् अतः सप्त-
दितसपदम् उपमितावतिव्याप्तिवारणाय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

द्विस्थभागः प्रकृतिर्येन तदर्थे विभक्त्यर्थान्वयः स्यात् गभीरायामिति सप्तम्यन्तापत्तेश्च अपि विभक्त्यन्तस्यैव गभीरनदीतीरघोषार्थत्वलक्षकत्वमिति चेन्न अ
शक्तत्वात् तस्मात्पदद्वयएव विनिगमकाभावाद्दिशि ह नदीतीरे लक्षणा नचैकपदत्वे यथोपस्थितपरस्परतात्पर्यग्राहकत्वादिति संप्रदायविदः अन्यपदए
व लक्षणा विभक्त्यर्थान्वयानुरोधादिति नव्याः विस्तरस्त्वस्माकमणिमरीचि निबन्धतात्पर्यदीपिकयोरनुसन्धेयः । उपकुम्भमर्धपिप्पलीमादाव
पूर्वपदलक्षणायैवोपपत्तौ च शक्तिरूपेयते अन्यलभ्यत्वात् समाहारद्वन्द्वे पाणिपादमित्यादौ पाणिपदं पाणिप्रतियोगिकं पादपदं तु पादप्रति
योगिकसमाहारं लक्षयति न पाणिपादसमाहारे शक्तिः समाहारस्य तत्त्ववदेकक्रियान्वयित्वरूपं साहित्यम् सेनावनादिवदपेक्षाबुद्धिविशेषवि
षयत्वं वा नन्वेवं पाणिपादं वादयस्वेत्यत्रान्वयः समाहारे वादनकर्मत्वाभावादिति चेन्न परंपरया कर्मत्वान्वयादित्येके समाहारोत्तरविभक्त्यर्थक
र्मत्वादेः समाह्रियमाणएवान्वयः पदव्युत्पत्तिवैचित्र्यादित्यन्ये पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीतेर्न समाहारे लक्षणा शक्तिर्वा नचैवं द्विव
चनापत्तिरसाधुत्वात् इतरेतरद्वन्द्वेऽप्येवं धवखदिरावित्यत्र धवखदिरप्रतीतेर्न लक्षणा शक्तिर्वा मीमांसकास्तु अपि धवखदिरसाहित्याश्रये लक्षणा तदा
हुः । साहित्ये द्विवचनबहुवचने द्वन्द्वसमासश्चेति साहित्यं च तत्त्ववदेकक्रियान्वयित्वम् अतएव घटकर्मत्वेन तदन्यामदेवप्रपत्त्या सहभावमात्रेण तत्सा
हित्यम् यागादेः पल्लाग्रत्वमतिहायनेयेन तत्त्ववदन्वयादित्याहुः नीलोत्पलमित्यादौ नीलाभेदस्यान्वयविधये वभानोपपत्तेः कर्मधारयेन शक्ति
र्नवा लक्षणा अतएव तत्पुरुषात्कर्मधारयो लघीयान् तत्र हि पूर्वपदे संबन्धिलक्षणा अक्रमम् नञ्तत्पुरुषे घटः पटश्चेत्यत्र घटपदं घटसम्बन्धिपरं न
ञ्पदं चान्योन्याभाववाचकमेव संसर्गाभाववाचकनञ्स्तत्रान्योन्याभावे शक्तमिति चेन्न लाघवेन विनिगमनाविरहेण वाऽभावमात्रएव नञः शक्तत्वात्
अपिनानञ्पदसमस्तपर्यः धारणात् ननु नघटः पटइति वदभावघटयोरन्वयोपपत्तेर्न घटपदे लक्षणायुक्ताइति चेन्न नामार्थयोर्भेदेनान्वयस्याव्युत्पत्तेः कथं तर्हि नघटः पटस्या
न्वयइति चेत् घटपदस्य घटप्रतियोगिके लक्षणेति गृहाण प्रथमायाः षष्ठ्यर्थे विभक्तौ लक्षणा वा ननु सविभक्तौ लक्षणैवेति चेन्नहि कथंष प्रतियोगित्वे =
ष्ठीतः कर्मत्वाप्रत्ययः कथं चैकस्यां दारा इति बहुवचनं अन्तःप्राप्तनकीपलक्षणेऽपि वेति चेत्सत्यम् तदिदमाहुः नियतप्रयोगाद्विके विदग्धयार इति
तथापि नञर्थपदयोः कथमाख्यायाप्यभावेनान्वयः नञ्तत्पुरुषषष्ठीस्मरणादिति चेत् न षष्ठीलोपमजानतोऽपि त[illegible]तोर्थप्रत्ययात् नञ्पदस्य
भाववत्त्वतकमिति चेन्न घटस्याभावेनान्वयापत्तेः तस्य पदार्थैकदेशत्वात् मैवम् ससंबन्धिकस्थले एकदेशेऽप्यन्वयस्वीकारात् यथा चैत्रस्य पितेत्या

प्रतियोगिवाचकपदेन नियतः प्रयोगो येषां ते के विदग्धपुया
नमादिरूपाः प्रतियोगिवाचकपदापत्त्यान्वित स्वार्थबोध
का, के विदग्धाः इति — २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

घटो नेत्यादौ घटपदस्य घटप्रतियोगिके लक्षणया घटप्रतियोगिकस्यस्याभिन्नाभावा, ध्ययतासंबन्धेन प्रथमायाः प्रतियोगित्वे
लक्षणया तत्र घटस्य प्रतियोगिकाभावस्य प्रत्यतासंबन्धेन पदेऽन्वयः=१
अभावत्वेनेवपदे

व्या·मं· १·

दौ चैत्रस्य जनकत्वेऽन्वयः अन्येन समुदायपक्षे तत्पदार्थान्वयः परंपरासंबन्धेनेत्याहुः एकत्वाभाववद्वृत्तित्वकत्वमेवाऽन्यथाऽनन्तरं घटमित्यत्र समानवि-
भक्तिकत्वानुपपत्तेः परे तु निपातस्थलेऽन्यैव व्युत्पत्तिरिति घटतदभावयोः प्रतियोगप्रतियोगिभावेनान्वयोपपत्तौ न घटादिपदे लक्षणा अत एव चन्द्र इव मु-
खमित्यादौ चन्द्रस्वार्थयोर्भेदेनान्वयः अत एव घटो नास्तीत्यत्रापि घटतदभावयोरन्वयो निष्कलंक इत्याहुः तन्न मानाभावात् चन्द्र इव मुखमित्यादौ (प्रतियोगित्वे=)
त्वचन्द्रपदं तत्सादृश्यलक्षकम् इवपदं तात्पर्यग्राहकम् अत एव चन्द्रमिव मुखं पश्यामीत्यादौ अन्वयः अन्यथा तदनुपपत्तेः अस्तु वा षष्ठ्यर्थ एव विभक्तौ (चन्द्रपदोत्तरद्वितीयाविभक्तौ=)
लक्षणा अन्वयानुसन्धानाग्रहात् घटो नास्तीत्यत्रापि तथैव दोषः अन्येन घटो नास्तीत्यत्र घटस्याभावोऽस्तीति नार्थः तथा सति भूतले घटो नास्तीत्यापत्तेः
अभावस्यैकत्वादिति किं तु भूतलवृत्त्यभावप्रतियोगी घटोऽस्तीति तन्न केवलाधिकरणकान्तापत्तेः कथं तर्हि घटो नस्तदस्यादीति चेत् भावनानव्यभा-
वप्रतियोगिनि सत्त्वान्वयात् कथमिति चेत्तथैव प्रतीतेरिति निरूहरणा परे तु रहभूतले घटो नास्तीत्यत्र सप्तम्यर्थाधारतायां निषेध एव घटे प्रतीयते न (एकार्थसमवायेन सत्ताया जातौ सत्त्वात्=)
पचतिचैत्र इत्यत्रेव नाख्याते हि वचनानुपपत्तिः नन्वेवं जातौ सत्ता नास्तीत्यत्र का गतिः जातिवृत्तित्वाभावस्य सत्तायामसत्त्वात् जातिसमवेतत्वस्य चाप्रसि-
द्धानिषेद्धुमशक्यत्वात् यागतिर्जातिर्न सत्तावृत्तिरितिवाक्यस्य प्रयोगमेवेदं वाक्यम् वृत्तिपदं वा सामान्यसंबन्धावच्छिन्नवृत्तिपरमिति तत्त्वम् न
न्वापि न जर्थो निषेधो घटे कथमन्वेतीति चेन्न निपातातिरिक्तनामार्थस्य हि नामार्थेनाभेदेनान्वयो न नामार्थमात्रस्येति प्रतियत्ने स्यादेतत् घटो नास्ति
त्यादौ भेद एव प्रतीयते भूतले न घट इत्यत्र तु न्यूनाभाव एवेत्यत्र किं नियामकम् अधिकरणवाचकपदे सप्तमीविभक्तिरेव न्यूनाभावबोधे तन्त्रं प्रतियोगिन
नुयोगिपदयोः समानविभक्तिरन्योन्याभावबोधकरूपेति चेन्न नपचतिचैत्रः चैत्रस्य न धनमित्यत्र सप्तम्यभावात् अलङ्कृपचतीत्यत्र समानविभक्तेरभा-
वाच्च तत्राहुः नञ्विनिर्मोके यत्र प्रतियोग्यनुयोगिपदयोरभेदान्वयबोधे आकाङ्क्षा तत्रान्योन्याभावबोधकत्वमन्यत्रान्यबोधकत्वमिति व्युत्पत्तिः
अस्ति च न घटः पट इत्यत्र नञ्सत्त्वे घटपटयोरभेदान्वयबोधे आकाङ्क्षाऽतस्तत्रान्योन्याभावप्रत्ययः भूतले न घट इत्यत्र नञ्विनिर्मोकेनाभेदान्वये
आकाङ्क्षेति तत्र संसर्गाभावप्रत्यय एवेति संक्षेपः यत्तु नाचनरुघ्यन्तरम् लक्षणैयैव तदर्थसिद्धेः नन्विदमयुक्तम् तथाहि लक्षणायां मुख्यार्थे- १·
तरान्वयानुपपत्तिर्बीजम् न च व्यञ्जनायां सा सर्वत्रास्ति गच्छ गच्छसीत्यादौ तदभावात् अतो व्यञ्जनारूपाऽस्त्येवेति चेत् किमिदं लक्षणाबीजत्वम्
तावज्जनकत्वम् गङ्गातीरयोः सम्बन्धस्यानुपपत्तितानाजन्यत्वात् नापि तज्ज्ञापकत्वम् अनुपपत्तिज्ञानमन्तरेणापि गङ्गातीरयोः सम्बन्धस्यावग

अनलाक्तिवनिषेधः नामार्थयोरभेदनैवेति व्युत्पत्तेः=

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

रादिनाग्रहात् नापि तत्र सामर्थ्यग्राहकत्वम् तात्पर्यान्तरतोऽपि तद्ग्रहात् अथ लक्षणाजन्यशाब्दबोधे सहकारित्वं तदिति चेन्न यष्टीः प्रवेशयेत्यत्र व्य
भिचारात् तात्पर्यविषयार्थानुपपत्तिरत्रास्तीति चेत् न हि तात्पर्यानुपपत्तिरेवं सर्वत्र लक्षणाबीजमस्तु सा चेदाप्यस्ति स्यादेतत् गङ्गायां घोष इत्य
त्र लक्षणाप्रयोजनं शैत्यपावनत्वादिप्रतीतिः न च तन्मूलातिर्लक्षणासाध्या प्रयोजनाभावात् लक्षणायाः प्रयोजनवत्त्वनियमादिति चेन्न लक्ष्यप्र
तीतेरेव प्रयोजनत्वात् तथापि प्रयोजनान्तरं तत्र नास्तीति चेन्न किम् लक्षणाया हि प्रयोजनवत्त्वेन नियमो न तु लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वेन
गौरवात् अप्रयोजकत्वाच्च स्यादेतत् नानार्थस्थले तावदर्थविशेषप्रत्यये प्रकरणादिकं निर्णायकम् तथा च यत्र प्रकरणादिः स्वार्थान्तरं प्रतीयते
तत्र नाभिधामूलम् सहकार्यभावात् नापि लक्षणा योगादतः सिद्धं व्यञ्जनेति चेन्न प्रकरणादीनामननुगततया सहकारित्वानुपपत्तेः तात्प
र्यग्राहकत्वेनैषामनुगम इति चेन्न हि तात्पर्यग्राहकत्वेन सहकार्यस्तु सा चेदाप्यस्ति स्यादेतत् लक्षणा हि पदं हि निरूपितपदत्वादेकदेशवाक्यत्व
नार्थभङ्गाद्याकाराश्रितेत्याश्रयभेदाद्भेद इति चेन्न असिद्धेः तदेकदेशादयो ह्यर्थविशेषतात्पर्यग्राहका न तु तत्प्रतिपादका इति स्यादेतत् तद्धेतात्
पर्यत्वात् लक्षणासहकारि न तत्राप्यर्थतात्पर्यग्रहो नियतः स्वार्थरचितकाव्यादौ तात्पर्याविषयस्यापि व्यङ्ग्यस्य चमत्कारादिति चेन्न व्यङ्ग्यतात्पर्यग्रह
स्यानपेक्षत्वात् गङ्गायां घोष इत्यादौ शैत्यादिकमेव प्रतीयेत न तु केशवालुकादिमत्त्वमिति नियमो न स्यात् वासनाविशेषपरिपाकान्नियम इति चेत् तर्हि ल
क्षणास्थलेऽपि स नियामकोऽस्तु तत्तात्पर्यग्रहेणापि वक्तृतात्पर्यानायां गच्छ गच्छसीत्यत्र मा गा इत्यत्रास्यास्तात्पर्यमुन्नीयते सम्भाव्यते वा न तु मा गा इति
प्रतीयत इति कुतो व्यञ्जनेन स्यादेतत् यदि पले पवनकीर्तिर्दह्यते तर्हि प्रजयतीत्यादौ प्रकर्षबोधः न हि प्रादेः प्रकर्षादौ शक्तिः द्योतकत्वात् न च लक्षणा अ
शक्तत्वात् उच्यते जयतिरत्र प्रकृष्टजयलक्षकः प्रशब्दस्तु तात्पर्यग्राहकः न त्वमेव च द्योतकत्वम् न च जयतिशक्यप्रकर्षो न लक्ष्य इति वाच्यम् जय
मात्रे हि शक्यत्वं न तु विशिष्टजये तदाहुः प्राक्प्रादेर्द्योतकत्वेनाभवति लक्षणेति न तु प्रादेरेव प्रकर्षादौ न कथं शक्तिः कल्प्यत इति चेन्न अनन्यलभ्यत्वादिति
गदाधर व्युत्पत्तिरत्र लक्षणाधातोरेवार्थप्रत्यायपति धातलोपमजानतस्तदर्थप्रत्ययाभावादिति सङ्क्षेपः स्यादेतत् आख्यातस्य तावद्यत्नपवश्शक्यः
पचतीत्यत्र पाकं करोतीति विवरणात् व्यवहारवद्विवरणादपि च शक्तिग्रहः तथा च रथो गच्छतीत्यत्र न मुख्यप्रयोगः रथादीनामचेतनतया यामना
त्रकूलमयत्नस्य नत्वात् नापि लक्षणा विभक्तौ लक्षणानङ्गीकारात् अन्यथाव्यन्ययात्र शासनवैयर्थ्यादतः सिद्धं व्यञ्जनेति चेन्न व्यन्ययात्र शास

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

न्या॰ मं॰
११

नत्वलाद्विभक्त्यर्थेऽन्यस्मिन्न लक्षणा न त्वन्यत्रापि इहैव विभक्त्यर्थे नैव लक्षणा किंत्वव्यापारे इष्यते च विभक्त्यर्थेऽप्यनुशासनिकी यल्लक्षणा यथा कृद्योगे षष्ठ्याः
कर्मत्वे न च कर्मत्वमपि सम्बन्धः स च शक्य एवेति न लक्षणा कर्मत्वप्रकारकबोधस्य तया विनाऽसम्भवात् तत्प्रकारकबोधेन भवत्येव किंतु सम्बन्धत्व
प्रकारक इति चेन्न अनुशासनवैयर्थ्यात् द्वितीयायाश्च साधुत्वज्ञापकमनुशासनमिति चेन्न निपातादिवर्जनवैकल्यात् तत्र द्वितीयायाः साधुत्वज्ञापकमनु
शासनमिति चेन्न कृद्योगे विकल्पविधानवैयर्थ्यात् अनिषेधेनैव द्वितीयोपपत्तेः पाक्षिकषष्ठ्यर्थं तदिति चेन्न सम्बन्धप्रकारकबोधजनिकायाः शेषव
चनादेव सिद्धेः निपातादियोगे शेषषष्ठ्याश्च साधुत्वज्ञापकं तदिति चेन्न तद्योगेऽपि नाहस्याबहुप्युदर्शनात् किं च यदि विभक्तौ न लक्षणा कथं तर्हि ग्रामाविनं चटे ।
जानातीति विषयतायां कर्मत्वशक्ता द्वितीया विषयत्वे न वद्वितीयार्थः क्रियाजन्यफलशालित्वापेक्षया लघुत्वादिति चेन्न ईं ग्रामं गच्छतीत्यत्र कुतः कर्मत्वप्र ।
तीतिर्लक्षणां विनेति विभावनीयमायुष्मता आस्तां तत्रापि हयत्नरमिति चेन्न कृष्णेऽप्येवोपपत्तेः मीमांसकास्तु अनुकूलव्यापारमात्रमाख्यातार्थः रथो
गच्छतीत्यादौ मुख्यप्रयोगसिद्धेः इत्याहुः तन्न यत्नत्वस्य जातित्वेन तस्यैव शक्यतावच्छेदकत्वात् न त्वनुकूलव्यापारत्वम् तस्य गुरुत्वात् कथं तर्हि पाकानुकू ।
लतायत्नस्याभासत इति चेत् संसर्गविधयेत्यवेहि कथं तर्हि जानातीच्छति यतति करोतीत्यादयः प्रयोगाः न हि ज्ञानादावनुकूलयत्नोऽस्ति प्रतीयते वेति चेत् ।
आश्रयत्वावच्छेदकत्वादाख्यातस्येति गृहाण चिन्तामणिकृतस्तु जानातीत्यादौ धात्वर्थ एव चैत्रादेः सन्तान्वेति आख्यातस्य शक्तिपाद्यः कालः संख्या च न त्वयत्नो ।
ऽपि अयोग्यत्वादित्याहुः तच्चिन्त्यम् नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयबोधस्याव्युत्पत्तेः अन्यथौदनं पचतीत्यत्रौदनपाकयोः कर्मतासंसर्गेणान्वयः स्यात्
वस्तुतो जानातीत्यादावाख्यातार्थानवभासे आख्यातार्थसंख्यान्वयो न स्यात् तस्या आख्यातार्थविशेष्यगामित्वात् विभक्त्यर्था विशेषणीभूतनामार्थ आ
ख्यातार्थविशेष्यः तेन चैत्र ओदनं पचतीत्यत्र तथाविधश्चैत्र आख्यातार्थविशेष्यः न त्वोदनार्थः द्वितीयार्थविशेषणत्वात् पच्यते इत्यत्र कर्मणि कर्त्रा तृतीया ।
र्थाविरुद्धत्वात् स्थीयते इत्यत्र स्थित्यनुकूलाकृतिरिति आख्यातार्थे न विशेष्यत्वमिति संख्यानन्वितैव अत एवौत्सर्गिकमेकवचनमेवेत्याहुः धात्वर्थविशे
ष्यकोऽन्वयबोधः न चैवं धात्वर्थस्य द्वित्वादिविवक्षायां द्विवचनाद्यापत्तिः असाधुत्वादित्यपि कश्चित् स्यादेतत् आख्यातार्थः कालः उत्पत्तेरिति चेत् एक
पदोपात्तत्वप्रत्यासत्त्या कृत्यादिष्वेव हि धात्वर्थे इत्यपरे कथमन्यथा जानातीत्यादौ ज्ञाने वर्तमानत्वादिप्रतीयतेरिति स्यादेतत् भविष्यत्वातीतत्वे अस्याख्या ११
तविशेषवाच्ये भविष्यत्वं च विद्यमानप्रागभावप्रतियोगित्वम् विद्यमानध्वंसप्रतियोगित्वमतीतत्वमिति पचति चैत्रे भाविकृतिप्रागभावमादाय प

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्यतीति व्यापारकृतिध्वंसमादायापात्तीरितिस्यात् तस्मात् व्यापारकृतिप्रागभावसंबन्धविशिष्टान्वयेन चरमकृतिध्वंसस्यैवातीतप्रत्ययेनाभिधानात्
चैत्रौदनं पचतीत्यत्रौदननिष्ठविक्लित्तिजनकव्यापारविशेषककर्तृत्वं प्रतीयते तत्र विक्लित्तिस्तदनुकूलव्यापारश्च कस्यार्थः उच्यते विक्लित्तिः फलं
द्वितीयायाश्चार्थः तदनुकूलो विलक्षणव्यापारो धात्वर्थः अनुकूलता च संसर्गः तत्र कर्मत्वं द्वितीयावाच्यम् तच्च क्रियाजन्यफलशालित्वं न तु फल
मात्रमिति चेन्न क्रियाया धात्वैवाच्यत्वात् जन्यत्वाश्रयत्वयोश्च संसर्गमर्यादया लाभात् फलमात्र एव शक्तेः कल्पनात् अनन्यलभ्यो हि शब्दार्थः न तु फ
लमपि धात्वलभ्यमेव फलानुकूलो हि व्यापारो धात्वर्थ इति चेन्न फलानुकूलोपलक्षितो विलक्षणव्यापारो धात्वर्थः तत्र फलानुकूलत्वमपि गौ
रवात् नन्वेवं त्यजिगम्योः पर्यायता स्यात् तथाहि संयोगानुकूलं कर्म गमेरर्थः विभागानुकूलं च कर्म त्यजेरर्थः तत्र यदि फलानुकूलत्वमुपल
क्षणं तदा कर्ममात्रं शक्यं तत्र वाच्यम् तथा च तुल्यैव पर्यायता आस्तां पर्यायता को दोष इति चेन्न ग्रामं गच्छतीतिवत् ग्रामं त्यजतीत्यापत्तेः नैवम् ग
च्छतीत्यादिसमभिव्याहृतद्वितीयायाः संयोगफलबोधकत्वव्युत्पत्तेः त्यजतीत्यादिसमभिव्याहृतायाश्च विभागबोधकत्वव्युत्पत्तेरेव यथोक्तातिप्रस
निरा ङ्गवारणात् न्यायभास्करकृतस्तु फलमवच्छेदकमेव द्वितीयार्थस्तदाश्रयता नचैवं भूमौ पर्णं पततीत्यत्र भूमिपदाद् द्वितीयापत्तिः समभिव्याहृतधात्व
र्थतावच्छेदकफलाश्रयताया बोधकत्वव्युत्पत्तेः अतएव धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति लक्षणं ध्रुवम् नहि क्रियाजन्यफलशालित्वं तत्
हेतावुभौ पततीत्यत्र वृक्षभूम्योः कर्मजन्यविभागसंयोगाश्रयतया कर्मत्वापत्तेः ननु तवाप्यधःसंयोगानुकूलव्यापारस्य पतत्यर्थतया कर्मत्वं भूमेर्दु
स्त्यजमिति चेन्न पतत्यर्थफलस्यावच्छेदकत्वानङ्गीकारात् तथात्वर्थानधिकरणत्वे सतीति विशेषणाच्च नचैवं स्वधात्वर्थतावच्छेदकफलशालिसं
योगाश्रयत्वेऽपि कर्मत्वमिति स्वीकर्तव्यमिति संक्षेपः तस्य शब्दस्य निराकाङ्क्षत्वादन्वयाबोधकत्वादित्यादिकं सहसहकारि यत्र यत्पदं येन पदेन स
हयाहृत्यान्वयबोधजनकं तत्पदं तत्पदसमभिव्याहारस्याहृत्यान्वयबोधे आकाङ्क्षा भवति हि नामपदस्य तत्र खलु विभक्तिपदेनैव सहान्वयबोधक
मतस्तस्य तत्समभिव्याहारस्याहृत्यान्वयस्याकाङ्क्षा अतएव घटः कर्मत्वमित्यनेन न घटमिति वदन्वयबोधः आकाङ्क्षाविरहात् धातुपदं चाख्यातपदेनै
व सहान्वयविशेषबोधकमिति भवति तत्राख्यातपदसमभिव्याहारस्याकाङ्क्षा अतएवानयनं कृतिरित्यादौ आनयतीतिवन्नान्वयबोधः कृतिवाचका
ख्यातसमभिव्याहाराभावेन निराकाङ्क्षत्वात् नत्वनामपदं द्वितीयादिविभक्तिसमभिव्याहृतमेव कर्मत्वादीनामाश्रयाश्रयिभावेनान्वयबोधकमित्यत्र

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

व्यु॰ सं॰
१२
12

किंनियामकमिति चेत् नाम्नः स्वार्थनिष्ठकर्मत्वानुभवजनने तदुपस्थापकविभक्तिसहकारित्वमिति गृहाण इत्थं चैवं यस्य तु रुषस्याहरः कर्मत्वमित्यादिवाक्य
व्युत्पत्तिरस्तु कृतमस्तोऽन्वयबोध इति चेत् तस्मिन्नुरुष एव मानं नास्ति काव्याप्यालादन्वयबोधे तथापि यदि कश्चिन्नाहरः स्यान्न स्यात्किंभविष्यतीति चेत् ।
शाब्दानुभववैधुर्यमेवान्वयव्यतिरेकसिद्धं कारणविरहात् एतस्याकाङ्क्षायाज्ञाने हेतुत्वस्य तु क्रमेणान्वयबोधात् अपराच प्रकृतान्वयबोधस्य समाना
कारत्वजन्यान्वयबोधविरहः प्रकृतान्वयबोधे स्वरूपसती हेतुराकाङ्क्षा अतो ह्रदमानयतीत्यत्र एकदान्वयबोधजनितेनान्वयबोधान्तरजनकत्वजन्या
न्वयबोधवैधुर्यविरहात् एवं च गामानयेत्यतोऽन्वयबोधे जाते दण्डेनेत्यन्वयबोधे निराकाङ्क्षात्मात् - अतएव प्रकृतान्वयबोधसमानकारत्वेति नच गामा
नयेत्यन्वयबोधः प्रकृतो येन दण्डेन गामानयेत्यन्वयबोधे समानाकारत्वेति दिक् योग्यता चैकपदार्थे परपदार्थस्य प्रकृतसंसर्गवत्त्वम् तेन पयसा सिञ्चती
ति योग्यम् पयसि सेकसंसर्गस्य सत्वात् यस्मिंश्च पयसि सेकसंसर्गो नास्ति तस्मिन्नयोग्यम् आकाशं वा हरत्यत्र समवायरूपसंसर्गवत्त्वमादाय भेदा
न्वयबोधेपि योग्यता स्यादत आह प्रकृतेति अस्याश्च ज्ञानं कारणम् तद्भ्रमेणाप्यन्वयबोधात् न तु संसर्गस्य एवं तावत्कथं पृथग्ज्ञानं संभवेदिति चेदुच्यते ।
योग्यताया ज्ञानमात्रं हेतुः अग्निना वा पयः सेककरणतावदेवेति संशयरूपतान्यम् क्वचित्तन्निश्चयोऽस्ति यथा प्रत्यक्षेण दृष्टे ह्रदो वह्निरस्तीति परेतु संसर्गग्रहः
प्रतिबन्धकस्तदभावो योग्यता स्वरूपसती हेतुः नचैवं जलह्रदो वह्निमानित्यप्यसंसर्गाग्रहदशायां योग्यं स्यात् इष्टत्वात् न च तादृशासंसर्गज्ञाने कारणान्त
त्वसंसर्गाग्रहत्वेति वाच्यम् असंसर्गाग्रहस्य लौकिकसाक्षात्कारातिरिक्तमिव्यादिदोषाजन्यविशिष्टज्ञानमात्रे एव हेतुतावधारणात् कथमन्यथा चन्दनं न
सुरभिरिति निश्चयेऽसुरभिचन्दनमिति ज्ञानं न स्यात् तदभावात्तु मिलावपि चत्वयाह्यदस्य लौकिकसाक्षात्कारः शाब्दे सुपीनत्वभ्रमस्य दृश्यं तदजन्यान्न
न च तदेकाभिधेयरत्वे तदभिधेयतासंसर्गाप्रसिद्ध्या तदग्रहाप्रसिद्धिः अभिधेयत्वप्रतियोगिकत्वेन योऽभावश्चमसत्वादभावस्य प्रसिद्धेः यदि सोपि न प्रसिद्धस्त
दासंसर्गयोग्यताहेतुरेव नचैवं व्यभिचाराकाङ्क्षाद्बोधं प्रतियोग्यतायाः कथं कारणत्वमिति वाच्यम् तद्विशाब्दबोधत्वावच्छेदेन योग्यतायाः कारणत्वम्
किंतु तदीयतादृशान्वयबोधे तदीयतादृशान्वयविरहनिश्चयाभाववत्वेनैव विशिष्टे वेतिकव्यवहाररस्मादृः आसत्तिः पदाव्यवधानम् अतएव गिरि
रग्निमानित्यासत्त्वम् अनासत्त्वं च गिरिर्भुक्तमग्निमान्देवदत्तेनेति नचैवं स्थाल्यामोदनं पचतीति स्थाल्यामित्यस्य पाकेनानासन्नतापत्तिः ओदनमित्यनेन । १२
व्यवधानादिति वाच्यम् प्रकृतान्वयबोधानुकूलपदाव्यवधानाभावस्य विवक्षितत्वात् ओदनपदं तस्यास्त्वधिकरणकम् ओदनकर्मकपाककर्तृत्वान्वयबो

न॰

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

धात्रत्कलमेव स्यात्तांपचतीत्यन्वये त्वनासन्नमेवेति प्राञ्चः नचैवं श्लोकादेर्योजनयाऽप्यन्वयबोधः कथम् अव्यवहितत्वेन प्रत्यासत्तिसिद्धेः अव्यवहि-
तत्वस्यासंभवादिति वाच्यम् तत्र हि श्लोकपदानामन्वयबोधः किं तु योजनावाक्यादित्याहुः वस्तुतस्त्वाकाङ्क्षादिमत्त्वे सति तात्पर्यज्ञानेनाव्यवहि-
तेऽप्यन्वयबोधात् न हि तत्त्वेना विलम्बाच्च मेलनज्ञानं हेतुः किं त्वव्यवहितत्वतात्पर्यज्ञानम् तच्चैतत्पदमेतत्पदाव्यवहितोत्तरमभिसन्धाय तदुत्तरत्वमभिसं-
धापयितुरिच्छा अत एव मौनिश्लोकेऽप्यासत्तिः वक्तुरभावेऽप्यभिसन्धापयितुः सत्त्वात् शुकवाक्ये च भगवत्तात्पर्यमादायैव गतिरिति नव्याः तद-
पि न समर्थं तात्पर्यज्ञानादावव्यवहितत्वेन शाब्दबोधाविलम्बात् तस्मादव्यापदजन्यपदार्थोपस्थितिरासत्तिः सा च स्वरूपसती हेतुः न हि पदा-
र्थानुपस्थितावन्वयबोधः न च हेत्वापदजन्येति व्यर्थम् घटपदात्समवायेनाकाशस्मृतौ घटोऽस्तीति वाक्यादाकाशान्वयबोधापत्तेः ननु घटमा-
नयेत्यत्र घटकर्मत्वानयनकृत्युपस्थितीनां न युगपत्सम्भवः आशुविनाशिनां क्रमिकाणां मेलकाभावादिति चेन्न क्रमिकपदानुभवजन्यानेक-
संस्कारैस्[illegible]त्रावच्छदार्थस्मृतावन्वयबोधः संभवतीति संक्षेपः अत एवाव्यवधानेन पदजन्यपदार्थोपस्थितिरासत्तिरित्यपास्तम् ततीयो-
अर्थतात्पर्यं च= त्वेयर्थेन अव्यवहितोपस्थितावेकस्याऽऽशूपस्थितेर्विनाशात् तात्पर्यं चेदं एतस्मिन्नर्थे एतान्वयं प्रत्याययत्विति प्रयोक्तुरिच्छा प्रयोक्ता चाभिसन्धा- अपरपदार्थस=
पयितुम् न तु वक्तैव मौनिश्लोकाव्याप्तेः शुकवाक्ये च भगवदिच्छैव गतिस्तस्य च निश्चयो हेतुः अस्याः संशये व्यतिरेकनिश्चये चान्वयाबोधात् त-
द्धेत्वान्वयबोधाद्वेति संक्षेपः सोऽयं शब्दो द्विविधः विधिरर्थवादश्च तत्र विध्यभिधायकः प्रत्ययः तद्वद्वितत्वाक्यं वा विधिः अभिधेयं विधिश्च कार्यत्वम्
तच्च कृतिसाध्यत्वमिति किमत्र मानमिति चेत् विधिस्तावत् स्वर्गकर्मज्ञानमजनयित्वा प्रवृत्तिजनिकामिच्छामजनयित्वा न प्रवृत्तिजननायालम्।
अतो यस्य बुद्धिः प्रवृत्तिजननीमिच्छां सूते स एव विधेरभिधेयः प्रवृत्तिजननी च कृतिसाध्यत्वप्रकारिकेच्छा तज्जननी च कृतिसाध्यत्वप्रकारिका बुद्धिः।
कृतिसाध्यत्वज्ञानेन तदनुपपत्तेः न तु कृतिसाध्यत्वप्रकारकज्ञानाभावो गौरवात् सर्वदा चिकीर्षोत्पत्त्यापत्तेश्च सर्वदा तत्सत्त्वात् अतः कृतिसाध्य-
त्वमेव विध्यर्थ इति नन्वेवं मण्डलीकरणादि विवाक्याद्यत्र कृतिसाध्यताज्ञानं बलवद्विष्टाजनकमेव मण्डलीकरणं जानतो मण्डलीकरणे
प्रवृत्तिः स्यात् अथ बलवदनिष्टाननुबन्धिकृतिसाध्यताज्ञानं प्रवर्तकमिति चेत् दिष्ट्यमपीष्टाजनकत्वेन बलवदनिष्टाननुबन्धिकृतिसाध्यत्वेन च
मण्डलीकरणं जानतस्तत्र प्रवृत्तिः स्यात् प्रवृत्तिजनकज्ञानस्य सत्त्वात् अतः शुभाकरानुवर्त्तिनः विशेषो वादिमत्प्रतिसन्धानजन्यकार्यताज्ञानं प्र-

एतत्पदमेतत्पदेन सह संभूयान्वयबोधं जनयतु=२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

वर्त्तकम् अन्यथा चेष्टसाधनताज्ञानजन्यमिष्टसाधनताज्ञानकालीनं वा कार्यताज्ञानं प्रवृत्तिहेतुः प्रवृत्तिसामान्ये च कार्यताज्ञानसामान्यमिति न क-
श्चिद्दोषः नचैवं बलानुवादिष्टसाधनत्वविषयककार्यताज्ञानमेव प्रवृत्तिसामान्ये हेतुरिति वाच्यम् निषेधे तदभावात् साध्यत्वसाधनत्वयोर्विरोधे-
नैकस्मिन् कृतिसाध्यत्वेष्टसाधनत्वयोः समानाभावाच्च कथमनयोर्विरोध इति चेदित्थम् साधनत्वं हि सिद्धधर्मः असिद्धावस्थाकार्याननुगतेः साध्यत्वं
चासिद्धधर्मः सिद्धत्वदशायां तदभावात् नचैकमेकदा सिद्धमसिद्धं च येनैकमेकदा कृतिसाध्यत्वमिष्टसाधनत्वं च स्यादिति अत्र जरन्नैयायिकाः ।
इष्टसाधनताविषयकं कृतिसाध्यताज्ञानमेव लाघवात् प्रवर्त्तकम् न त्विष्टसाधनताज्ञानजन्यं कार्यताज्ञानं गौरवात् न चैवं निषिद्धे इष्टसाधनताज्ञा-
नासंभवः फलाभावादिति वाच्यम् नित्येऽपि वक्ष्यमाणफलश्रुतेः यत्र च फलश्रुतिर्नास्ति तत्रास्तां विश्वजिन्न्यायात् स्वर्गः फलं प्रत्यवायपरिहारो वा न चैवं
फलकामनाधीनकर्त्तव्यत्वेन काम्यत्वस्यान्न तु नित्यत्वमपीति वाच्यम् नहि फलकामनानधीनकर्त्तव्यत्वं नित्यत्वं ब्रूमः किन्तु यदकरणे प्रत्यवायस्तत्त्वम् तच्च
काम्ये नोपाधिकर्त्तव्यत्वेऽप्युक्तमेव नचैवं फले यदि कामना नास्ति तदा सन्ध्यावन्दनादौ अप्रवृत्तिः स्यादिति वाच्यम् इष्टत्वात् नहि प्रयोजनमनुद्दिश्य मन्दोऽपि
प्रवर्त्तते नन्वेवं कामनाधिकारिविशेषणं स्यात् तथा च यदि फले कामना नास्ति तदा पुरुषस्याशुचेरिवानधिकारित्वात् नित्याकरणेऽपि प्रत्यवायो न स्या-
दिति चेन्न न तत्र प्रत्यवायः प्रामाणिकः स्यात् तर्हि कामनाधिकारिविशेषणं न तु वेदबोधितमिष्टसाधनत्वमपि प्रामाणिकं तावत् कस्य तावत्कामनेन
यावदधिकारवत्ता मकरणमेव प्रत्यवायहेतुरिति न किंचिदेतत् न च साध्यत्वसाधनत्वयोर्विरोधः एकस्मिन्पाके ओदनसाधनत्वकृतिसाध्यत्व-
योः सत्त्वात् कथमन्यथा चेष्टसाधनताज्ञानकालीनं कार्यताज्ञानं पाकादौ प्रवर्त्तकमिति कृतिसाध्यत्वे च बलवदनिष्टाननुबन्धित्वं विशेषणं देय-
म् नातो मधुविषसंपृक्तान्नभोजने कृतिसाध्यत्वेष्टसाधनत्वेन च ज्ञातेऽपि प्रवृत्तिर्बलवदनिष्टाननुबन्धित्वेन ग्रहात् यदा च बलवदनिष्टाननुबन्धि-
त्वेन ज्ञायते तदा प्रवर्त्तत एव एवं च बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वविषयकं ज्ञानं प्रवर्त्तकम् निषेध्येऽपि बलवदनिष्टाननुब-
न्धीष्टसाधनत्वे सति कृतिसाध्यत्वम् अत एव कलञ्जभक्षणेऽपीष्टसाधनत्वे सति कृतिसाध्यत्वेऽपि बलवदनिष्टाननुबन्धित्वाभावात् विशिष्टाऽ- १२
भावोऽस्ति न कलञ्जं भक्षयेदिति विध्यर्थनिषेध उपपद्यते कथं तर्हि श्येनेनाभिचरन् यजेतेत्यत्र विधिप्रवृत्तिः श्येनस्य हिंसात्वेन नरकरूपबलवद-
निष्टाननुबन्धित्वादिति चेन्न श्येनो हि वधसाधनं न तु नरकसाधनं मानाभावात् श्येनाच्च वधो वधाच्च नरक इति न तत्रास्तिकानां प्रवृत्तिः ननु श्येनो मरण

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नकृलव्यापारत्वेन हिंसा सा च नरकजनिकेति चेन्न नहि मरणानुकूलव्यापारमात्रं सा कूपादौ विनष्टेन वितत्कर्तृगोवधकर्तृत्वप्रसङ्गात् नापि म-
रणोद्देशेनानुष्ठीयमानत्वे सतीति विशेषितं गङ्गामरणोद्देशेन तत्रिसन्ध्यस्नानयागादेरपि तत्त्वापत्तेः अग्रहणाहारामरणानुकूलत्वं विवक्षितमिति चे-
त् न हि कथंपरेण नरस्य हिंसात्वमिति न त्वास्तु बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानत्वेन हेतुत्वम् कृतिसाध्यत्वे सति बलवदनि-
ष्टाननुबन्धीष्टसाधनताज्ञानत्वेन बलवदनिष्टाननुबन्धि कृतिसाध्यत्वे सतीष्टसाधनत्वेन वेत्यत्र विनिगमनाविरहः अस्तु तेनापि रूपेण हेतुत्वमिति
चेन्न हि कार्यताज्ञानत्वादिनैव हेतुतास्तु लाघवात् वस्तुतस्तु कृतिसाध्यताधीत्वेनैव चिकीर्षां प्रति हेतुत्वम् नन्वेवमिष्टाजनकेऽपि चिकीर्षा स्यादिति चेत्
स्यादेवस्त्वादौ इष्टाजनकत्वेन ज्ञाने मरणाङ्गीकरणादौ चिकीर्षा स्यादिति चेन्न उपायेच्छासामान्यसामग्र्यभावात् केयमुपायेच्छासामग्रीति चेत् इष्टसाध-
नताज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानं च बलवदनिष्टसाधनताज्ञानं वा प्रतिबन्धकम् इष्टसाधनत्वं च विद्यमानेच्छाविषयो यस्तत्साधनत्वम् इ-
च्छाविषयत्वं च स्वरूपसद्विशेषणम् न तु तस्यापि ज्ञानं कारणम् एवं च यदा स्वर्गादाविच्छा यागादेस्तत्साधनताधीस्तदा यागादाविच्छेति ध्येयम्।
विध्यर्थोऽपीष्टसाधनत्वं कृतिसाध्यत्वं बलवदनिष्टाजनकत्वं च न तु विशिष्टम् विशेषणविशेष्यभावे विनिगमनाभावात् न कलञ्जं भक्षयेदित्यत्र च कृति-
साध्यत्वेष्टसाधनत्वयोर्नञर्थेऽन्वयः तस्य कार्यत्वात् इष्टसाधनत्वाच्च किं तु बलवदनिष्टाननुबन्धित्वस्य श्येनेनाभिचरन्यजेदित्यत्र बलवदनिष्टाननुब-
न्धित्वस्यानन्वयो बाधात् इष्टसाधनत्वकृतिसाध्यत्वयोस्त्वन्वयः स्यादेवाबाधादिति संक्षेपः। सोऽयं विधिस्त्रिविधः अपूर्वविधिर्नियमविधिः परिसङ्ख्या
चेति तदुक्तम् विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति कीर्त्यते इति उदाहरणानि व्रीहीन्प्रोक्षतीति व्रीहीनवहन्ति पञ्च
पञ्चनखा भक्ष्या इत्यादि अग्रगुरवः नेष्टसाधनत्वं विध्यर्थः स्वर्गकामो यजेतेत्यनेन विधिना तस्य बोधयितुमशक्यत्वात् तथाहि स्वर्गकामस्येष्टसा-
धनं यागस्तेनेन बोध्यः इष्टं चात्र कामत्वेनोपस्थितः स्वर्ग एव न चेदं शक्यम् साक्षात्साधनत्वस्याशुविनाशितया असम्भवात् न च परम्परया स्वर्गसाधन-
त्वं बोध्यम् परम्पराघटकापूर्वानुपस्थितेः नापि कार्यत्वम् स्वर्गकामिकार्यत्वस्य यागे बोधयितुमशक्यत्वात् तथाहि शाब्दे योग्यताज्ञानं हेतुः योग्य-
ता चान्वयप्रयोजकरूपवत्त्वम् अत एव सेकान्वयप्रयोजकं द्रवद्रव्यत्वं जलेऽस्तीति तद्योग्यम् वह्नौ च नास्तीति तदयोग्यम् प्रकृते च कामिकार्यतान्वयेऽष्ट-
साधनत्वमन्वयप्रयोजकं न तु गृहीतं प्राक्यमित्युक्तम् तस्मात्कार्यमपूर्वमेव विध्यर्थः तस्मिंश्च यागस्य विषयतयान्वयः नन्वपूर्वस्यापूर्वमनुपस्थित

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्वात्तत्रशक्तिग्रहोऽनुपपन्नः अथ कार्यत्वेन कार्यसामान्य एव शक्तिग्रहः योग्यताबलाच्चापूर्वे व्यक्तेर्लाभः न हि यागविषयकमन्यत्कार्यं सम्भवतीति चेन्न स्व
ज्ञानादेरपि सम्भवात् उच्यते कार्यत्वावत् स्वर्गकामस्यान्वयो नियोज्यनियोजकभावलक्षणः तत्र कामी नियोज्यो नियोजकं च कार्यम् अतः कार्ये नियोज-
कत्वमेव स्वर्गकामस्यान्वयः नियोजकत्वं च तत्कामिकार्यतया प्रतीयमानत्वम् अत्र चान्वयप्रयोजकं काम्यसाधनत्वं न हि कामी काम्याद् अन्यत्काम्यसाध-
15
नत्वेन हि कामी काम्यज्ञातं कार्यतया वेत्ति न च काम्यासाधनं काम्यसाधनत्वेन ज्ञायते अन्यथाख्यातेरनभ्युपगमात् न च ज्ञानं काम्यस्य स्वर्गस्य
कार्य॰ साधनं संभवतीत्यतो योग्यताबलाद्यागविषयकं स्वर्गकामीयम् स्वर्गकामो यागविषयककार्यवानित्येवं वाऽनुभवोऽनुभवन्योग्यतया अपूर्वमा-
लंबते एवं काम्यत्वेन ज्ञानत्रशक्तिर्लिङः नित्ये निषेधेऽपि विधेरपूर्वमाह लोके च एवं वेदिस्यादावपूर्वे तात्पर्यसंभवात् (कार्यत्वे लक्षणे स्याद्दुः अत्रोच्यते)
कार्यत्वे लक्षणे स्याद्दुः अत्रोच्यते कार्यत्वस्य एव विधेः शक्तिलीनत्वात् न तु कार्यत्वविशिष्टे न च यागे स्वर्गकामकार्यताऽन्वयाऽसंभवो बाधकाभा-
वात् न च योग्यताज्ञानविरहो बाधकाभावात् नत्वन्वयप्रयोजकरूपवत्त्वं योग्यता सैकात्वयितो येऽपि सत्त्वात् किं तु प्रकृते न संसर्गवत्त्वम् तस्य च संश-
यसाधारण्याज्ञानं हेतुः न च यागे स्वर्गकामिकार्यत्वस्य संप्रयोगः संभवति येनैवं स्यात् यूथोक्तमिष्टसाधनत्वेन विध्यर्थः यागे तस्य लिङ्बोधयि-
तुमशक्यत्वादिति तदपि न बाधकाभावात् उक्तं बाधकमिति चेन्न सामान्यपरत्वाद् इष्टसाधनसामान्यस्य लिङ्बोधनात् यथा रूपवोधे च र-
न्वत्र नीलत्वादीविशुद्धरूपसामान्यज्ञानम् प्रत्येकविशेषबाधेऽप्यनुसामान्यज्ञानं तदितरत्वहीपेषत्वप्रकारता नियतं यथा घटेन जलमाहरेत्यत्र
च्छिद्रेतरत्वेन घटज्ञानमतोऽत्र सामान्यबाधे परंपरा तत्प्रकारकं ज्ञानं कार्यतत्त्वं न संभवति द्वारानुपस्थितेरिति चेन्न घटेन जलमाहरेत्यत्र हि योग्यतया व-
त्वेनोपस्थिच्छिद्रेतरत्वत्वयोग्यत्वतदितरत्वेन तदुपस्थापकाभावात् न च तल्लक्षणया तदुपस्थितिर्मानाभावात् अस्तां वाऽत्रापि सामान्यसाधनत्व
प्रकारेणैवान्वयः किं नश्छिन्नम् अथ योग्यताज्ञानविरहो बाधकः तथा हि आशुविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्यन्तस्था-
यिव्यापारजनकत्वमन्वयप्रयोजकम् न चेह तथा ज्ञानं संभवतीति चेन्न अन्वयप्रयोजकरूपत्वस्य योग्यतात्वनिरासात् नन्वेवं कथमपूर्वलाभ इति चे- २८
त् आशुविनाशिनः कालान्तरभाविफलजनकत्वस्य तत्कालस्थायिभावव्यापारकत्वव्याप्तेः तदुक्तमाचार्यैः चिरध्वस्तं फलायालं न कर्मातिश-
यं विनेति महात्मा धार्मिकत्वनातोऽधर्मकल्पनायालघुत्वात् यागादेरेव स्थायित्वयुक्तं न तत्पूर्वम् न चैवमिदानीं यागप्रध्वंसात् फलोत्पत्तिः आत्मवि-

ता॰

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

शेषगुणानां हि द्वितीयवत्त्वाल्लोकयोगपद्यादित्याहुः तन्न इदानीमयमेव यमिति प्रत्यक्षविरोधात् विधिभिन्नोऽर्थवादः स तु त्रिविधः गु
णवादोऽनुवादो भूतार्थवादश्चेति तदुक्तं विरोधे गुणवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः सो
ऽयं शब्दो नित्यः उत्पन्नो गकारो विनष्टो गकार इति प्रतीतेः अत्र गुरवः नित्यः शब्दो व्योमैकगुणत्वात् तत्परिमाणवत् न चात्र
योऽनेके सोऽयं गकार इति प्रत्यभिज्ञानस्य नानात्वानुपपत्तेः न चायं भ्रमो बाधकाभावात् न चोत्पत्त्यादिप्रतीतिर्बाधिका तस्याभि
व्यञ्जकवायूत्पत्त्यादिविषयत्वादित्याहुः तन्न गकारगतत्वेन उत्पत्त्यादिप्रतीतेः न चासौ भ्रान्तिर्बाधकाभावात् प्रत्यभिज्ञानं बाध
कमिति चेत् न येन सा बाधिता स्यात् किन्न स्यात् न ह्यत्र विनिगमकमस्ति न चैवं विनिगमकाभावे विनाशादिप्रत्ययस्यैव कुतो बा
धितत्वमिति चेन्न उत्पत्तिविनाशप्रत्यययोर्बाध्यत्वकल्पनापेक्षया प्रत्यभिज्ञानमात्रस्य बाध्यत्वकल्पनायां लाघवात् अन्ये तु
विनिगमकाभावादुभयोरेव प्रमात्वे कथमिति चेत् प्रत्यभिज्ञानस्य गत्वावच्छिन्नभेदाभावविषयत्वात् तथा च सति गकारो
यमिति स्यान्न तु सोऽयमिति चेन्न सोऽयमित्यस्यापि तद्व्यक्तित्वावच्छिन्नाभिन्नोऽयमित्यर्थात् गकारोऽयमित्यत्र च गत्वेन तद्व्यक्तित्वानवगाहनात्
तथा च सति तज्जातीयोऽयमिति स्यादिति चेन्न गत्वे जातित्वानवभासनादित्याहुः भट्टास्तु शब्दो नित्यो निःस्पर्शद्रव्यत्वादात्मवदि
त्याहुः तदपि न उक्तदोषात् शब्दस्य द्रव्यत्वे मानाभावाच्च शब्दो द्रव्यं साक्षात्सम्बन्धेनेन्द्रियग्राह्यत्वात् घटवदिति चेन्न अप्रयोजक
त्वात् शब्दस्यानीरूपद्रव्यत्वेन बहिरिन्द्रियाग्राह्यतापत्तेः अन्ये तु वर्णा नित्या ध्वन्यन्यशब्दत्वात् स्फोटवदित्याहुः तदप्यत एव निरा
स्तं वर्णातिरिक्तश्च न हि वर्णातिरिक्तः स्फोटात्मकः प्रमाणसिद्धोऽस्ति नन्वस्ति स्फोटः तथा हि पदानां वर्णकदम्बरूपाणामाशुतरविना
शितया मेलनासम्भवात् अमन्तत्त्वेनावविरुद्धं तथा च तदप्रत्यये कुतोऽर्थप्रत्ययः स्यादतस्तदभिव्यङ्ग्यः पदस्फोटः कश्चिद
भ्युपेयो यतोऽर्थप्रत्यय इति तदप्युक्तं स हि स्फोटस्तावद्वर्णव्यङ्ग्यस्तावतां मध्ये यत्किञ्चिद्वर्णव्यङ्ग्यो वा नानावर्णाभिव्यक्तिव्यङ्ग्यो वा नाद्यः

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२ ॥ तावद्वर्णगोचरप्रत्ययस्य पदत्वं न संभवतीति चेन्न तावद्वर्णगोचरसंस्कारात्स्मृत्यालेखनरूपतावद्वर्णगोचरस्मरणसंभवात् नवतीः ॥ २

आशुविनाशिनां क्रमिकाणां तेषां मेलनासंभवात् न द्वितीयः ककारमात्रोच्चारणोपटपदस्फोटप्रत्यये ॥ पटप्रत्ययापत्तेर्वर्णान्तरवैक-
ल्याच्च नान्त्यः तदसंभवात् अथ पूर्वपूर्वसंस्कार । वर्णगोचरसहितश्चरमवर्णोपलंभस्तद्व्यंजक इति चेत् नहि स एवार्थप्रत्यायको
ऽस्तु कृतं स्फोटेन अथ पदप्रतीतिबलात्तत्सिद्धिरिति चेन्न तस्य क्रमविशेषवत्तावद्वर्णगोचरत्वात् तावद्वर्णमात्रं न पदं अर्थाप्रत्याय-
कत्वात् अन्यथा नदीदीनयोरविशेषापत्तेः किंतु आनुपूर्वीविशेषविशिष्टतावद्वर्णरूपं न च तत्स्मृत्यसंभवतीति चेन्न श्रोत्रान्तरत्वे हि स्मा-
नुपूर्वी अलिखनस्य ग्रन्थं श्रोतरं शृणोतीति प्रतीतेरिति दिक् नन्वर्थापत्तिरपि प्रमाणान्तरं तथाहि पीनो देवदत्तो दिवा न भुंक्त इति अन्यथा न-
तरं दिवसाभोजिनः पीनत्वेनापि भोजनमन्तरेणानुपपन्नमिति नक्तं कल्पयति न चायं प्रत्यक्षादिकं त्वनुपपत्तिज्ञाने सैवार्थापत्तिरिति चेन्न केव-
लव्यतिरेकिण्येवोपपत्तेः तथाहि देवदत्तो रात्रौ भुंक्ते दिवा अभुंजानत्वे सति पीनत्वात् यन्नैवं तन्नैवं यथा केवलमभोजीति अर्थापत्तिपदं च
केवलव्यतिरेकिण एव नामान्तरमिति संक्षेपः अविदितकर्तृकः शब्दविशेष ऐतिह्यं नाम स च दिग्मात्रेण तदा शब्द एव नो चेत् प्रमाणमेव नेत्युभ-
यथापि न मानान्तरं इति सिद्धं चत्वारि प्रमाणानि इति नन्वर्थमिदं प्रमात्वमिति दोषात् तदेव तु [illegible] तेन हि तन्मयनदे ज्ञानस्यान्ते [illegible] त्वात् अन्यथा
ज्ञानं तज्ज्ञानानां ज्ञानमेव स्यात् ननु विषयान्तरसंचार इति [illegible] स्वप्रकाशमेव ज्ञानं घटादिकमिव स्वात्मानं स्वाधिकरणमात्मानं च वि-
षयीकरोति अत एव सर्वमेव ज्ञाने घटमहं जानामीत्याकारकं इत्थं च ज्ञानप्रमितिमात्रमेव विषयत्वात् त्रिपुटीप्रत्यक्षत्वेन प्रतिपादयन्त्याहुः तन्न
चक्षुर्जन्यघटज्ञानादिना स्वात्मनोऽविषयीकर्तुमशक्यत्वात् चाक्षुषादिज्ञाने विषयसंनिकर्षस्य हेतुत्वात् न चोत्पद्यमाने ज्ञाने पूर्वमसंनिस-
न्निकर्षेण कथं चाक्षुषास्य विषयतासंभवः चाक्षुषादिज्ञाने मनुष्य इत्येव [illegible] द्रव्यसंयोगत्वात् अन्यथा आकाशस्यापि चाक्षुषा-
पत्तेः भट्टास्तु ज्ञानेनावश्यं विषये ज्ञाततारव्यं फलं जन्यत इति निरूढं तथैवानुमेयं ज्ञानमित्याहुः तदपि न ज्ञाततायानिरस्तत्वात् ज्ञानस्य [illegible] ९५
साधारणप्रसिद्धौ अनुमानासंभवाच्च उत्पन्ने मनसैव ज्ञाने गृह्यते योग्यत्वात् न चैवं तत् ज्ञानमपि स्यादेवं तज्ज्ञानमपीत्यनवस्था विषयान्तरसंचारस

न्या.मं. ९५

15

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ततः^

प्रमाः प्रतिबन्धेन कस्यचिज्ज्ञानस्य मनसाग्रहात् तत्प्रतिबन्धकत्वे किं मानमिति चेत् फलानुपपत्तिरिति संक्षेपः तथापि तत्प्रामाण्यं केन गृ
ह्यते तत्तद्भावेन गृहीते शङ्कासाध्याप्रसिद्धेः अत्र महाः ज्ञानतया ज्ञानानुमितिर्जायमाना प्रामाण्यमपि विषयीकरोतीत्याहुः तन्न ज्ञानतया
हि ज्ञानमात्रं व्याप्तिग्रहीतात् प्रमात्वविशिष्टस्य वा नाद्यः ज्ञानमात्रसिद्धेः न द्वितीयः प्रमात्वमपि साध्यतावच्छेदकरूपेण साध्यस्याप्रसिद्धेः तत्तद्रू
पेणेति अन्यथा व्याप्त्याद्यग्रहादेरनिर्वाहात् इदन्त्वेन दीपत्वेन वा दृष्टान्तसिद्ध्यापत्तेः नान्त्यः व्यभिचारात् साध्याप्रसिद्धेश्च गौरवञ्च स्वप्रकाशम
हि ज्ञानस्येव स्वप्रामाण्यमपि सिद्ध्यतीत्याहुः तन्न स्वप्रकाशताया अप्रसिद्धेः किञ्च एवं ज्ञाने प्रामाण्यसंशयो न स्यात् ज्ञानग्रहे प्रामाण्यनिश्च
यात् निश्चिते च संशयायोगात् अग्रहे स्वप्रकाशताव्याघातात् धर्मिज्ञानाभावाच्च समानधर्मवत्तया धर्मिज्ञानस्यान्वयव्यतिरेकाभ्यां
संशयहेतुत्वावधारणात् मुरारिमिश्रास्तु तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं प्रामाण्यम् तच्च प्रथमानुव्यवसायेनैव गृह्यते तथा हि रजतत्व
वानिति व्यवसायोपनीतः अनुव्यवसाये तद्विशेष्यतासंसर्गरूपज्ञाने मनसा गृह्यते विशेषणतावच्छेदकस्य पूर्वमुपस्थितत्वात् न च मनसो बहिरर्थप्रका
शासामर्थ्यम् उपनयसहकारेण तस्य बहिरर्थप्रकाशकत्वात् कथमन्यथा कविकाव्यादौ मनसोऽभ्यन्तरानं कथं वा शुक्तावनुव्यवसाये विपरीतताभानं
रजतत्वमपि व्यवसायोपनीतमनन्तरं तत्प्रकारकताविशेष्यकतावत्त्वं गृह्यते इति उभयव्यापकत्वग्रहे गृहीते प्रामाण्यमिति तदपि न एवं हि तद्विशेष्यकत्व
तत्प्रकारकत्वे च गृहीतेन चैतावदेव तत्प्रामाण्यं किन्तु तद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वं न च तद्विशेष्यकत्ववैशिष्ट्यमनुव्यवसायो गृह्णातीत्यम
इति तद्विशेष्यकत्वस्य पूर्वमनुपस्थितेः संसर्गविधया हि विशेषणतावच्छेदकतया भासते किंचैतदपि न प्रामाण्यं वह्नित्वरजतयोर्ज्ञानं वह्नीति भ्रमे
ऽतिव्याप्तेः अस्ति हि तत्र वह्निविशेष्यकत्वं वह्नित्वप्रकारकत्वं किन्तु तद्विशेष्यकत्वावच्छेदेन तत्प्रकारकत्वमित्युक्तम् न चावच्छेद्यावच्छेदकभावः
प्रथमं गृहीतुं शक्यः तद्विशेष्यकत्वस्य पूर्वमुपस्थितेः अत्रोच्यते मास्तु प्रथमानुव्यवसायेन प्रामाण्यग्रहः द्वितीयेन तु स्यात् तद्विशेष्य
कत्वस्य पूर्वं प्रथमानुव्यवसायेनोपस्थितेः न चैवं प्रामाण्यस्यानुव्यवसायग्राह्यत्वे प्रामाण्यसंशयो न स्यादिति वाच्यं दोषवशाद्यत्र प्रामाण्यं नानु
व्यवसायेन गृहीतं तत्र संशयसंभवात् अन्यथा प्रत्यक्षत्वसंशयोऽपि न स्यात् तस्य च तद्वेद्यत्वात् न चैवं प्रामाण्यस्य स्वतो ग्राह्यत्वमागतम्

[Left margin:] अवच्छेदकत्वाय प्रमाण लिः= अतः तद्वत्त्व तः पूर्वमुपस्थितत्वात्=

[Right margin:] जाड्य^ वच्छेद्या^ अतः प्रामाण्यं तद्रूपदोष

प्रामाण्यमिश्वनुप्रस्वने - ८

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अप्रसज्यते

द्वितीयानुव्यवसायेन रक्तचित्प्रामाण्यग्रहश्च

प्रा० प्र० २६ अप्रतिबन्धके यावत्त्वा अथानुव्यवसायग्राह्यत्वे हि मिथ्यानयेस्वतो ग्राह्यत्वेन तत्र प्रथमानुव्यवसायेनाग्रहात् एवं च साध्याप्रसिद्धावनु
मानमानमपि नद्राहकं नियया इदं पुरुषज्ञानं प्रमात्वादिमतिपुरुषत्वज्ञानत्वात् संशयनिपन्नवत् यद्वा यत्रैवं तत्रैवं यथा घटः इति व्यतिरेकी अ
नेन प्रथमप्रमाप्रामाण्याभावपक्षे प्रामाण्यव्यतिरेकितत्साध्यम् न च साध्याप्रसिद्धिः नहि व्यतिरेकितत्साध्यहेत्वोर्व्याप्तिग्रहणे किं तु साध्याभा
वहेत्वभावयोः किं तु प्रसिद्धा न च साध्याप्रसिद्धौ तदभावाप्रसिद्धिः प्रतियोगिज्ञानसाध्यत्वादभावज्ञानस्येति वाच्यम् तस्य प्रतियोगिरूपत्वात् न च
प्रतियोगिज्ञानेऽभावज्ञाने कारणं एवं च यत्र व्यापकतया हेत्वभावो गृहीतस्तेन हेतुना तदभावः सिद्ध्यतीति न च साध्याज्ञाने कथं तद्विशिष्टज्ञानं तथा
नुमितिः अप्रामाण्याभावविशेष्यकयावत्प्रकारान्मितेः प्रमात्वमादित्याहुः आस्तां तावत् उक्तं पत्तिः तत्रापि तद्वति तत्प्रकारत्वग्रहे उक्तैव गतिः किं च
कत्वादिमतिपुरुषज्ञाने त्वेकेन ग्राह्यं अनुव्यवसायेनेति चेन्न हि पुरुषत्ववतितत्प्रकारकत्वग्रहः केन बाध्यताम् यत्तस्यापि हि यत्र यत्र कुत्र रजतत्वादेरि
अन्येन तत्प्रकारकज्ञानत्वमेव प्रामाण्यम् न च रजतत्वप्रकारकत्वस्यापि ज्ञाने न मपि प्रामाण्यं स्यात् तदसिद्धेः नहि यत्र यन्नास्ति तत्र तत्प्रकारकज्ञानेप्यानम
स्ति कथं तर्हि शुक्ताविदं रजतमिति व्यवहारः इति चेन्न तत्र व्यवहारेऽपि रजतत्वासंसर्गाग्रहात् रजतत्वप्रकारिकाप्रवृत्तौ शुक्तौ प्रवृत्तिरिति चेदनावकेऽरकर
जतत्वस्यासंसर्गाग्रहात् अथ रजतत्वग्रहेणैव रजतत्वप्रकारकज्ञानेन प्रामाण्येन कारणं त्वक्तम् तथा च तेन विना कथं शुक्तौ प्रवृत्तिः स्यादिति चेन्न न
चापि रजतत्वासंसर्गाग्रहस्य हेतुत्वात् अत्र यासंसर्गाग्रहस्य तत्प्रकारकसंवादिन्या विशेषणात् क्वचित् संवादिनी प्रवृत्तिः क्वचिद्विसंवादिनीति
कुतो नियम इति चेन्न तद्वति तत्संसर्गाग्रहस्य तत्प्रकारकसंवादिन्या तदभाववति तत्संसर्गाग्रहस्य तत्प्रकारकविसंवादिन्याः प्रवृत्तेर्हेतुत्वात् अत्रो
च्यते लाघवात् रजतत्वसंसर्गग्रहो रजतत्वप्रकारकप्रवृत्तौ हेतुः ननु रजतत्वासंसर्गाग्रहो गौरवात् न च शुक्तौ तदसंभवः विशेषणज्ञाने वि
शेष्येन्द्रियसन्निकर्षे सति तयोः संसर्गाग्रहो विशिष्टज्ञाने हेतुः अस्ति चात्रापि विशेषणज्ञाने विशेष्ये शुक्तौ इन्द्रियसन्निकर्षे तयोः संसर्गाग्रहश्च अथ
रजतत्वे इन्द्रियसन्निकर्षविरहात् कथं तत्प्रकारकं प्रत्यक्षमिति चेन्न सन्निहितं यत्र रजतं तत्र संयुक्तसमवायस्य अन्यत्र ज्ञानस्य सन्निकर्षस्य सत्त्वात्
ज्ञानस्य सन्निकर्षत्वे किं मानमिति चेत् रजतत्वप्रकारकप्रत्यक्षमित्येव हि न चैवं किं मानमिति चेन्न तत्प्रकारिकाप्रवृत्तिरिति संक्षेपः इति प्रामा १६

CC-0 Dharmartha Trust J&K. An eGangotri Initiative